# सोमज्योतिः



Shree Somnath Sanskrit University
Rajendra Bhuvan Road, **Veraval - 362 266.** District : Gir - Somnath (Gujarat)
Ph. : 02876-244532 Fax : 02876-244417 Website : www.shreesomnathsanskrituniversity.info

University Newsletter
Issue: **11** Month: **March** Year: **2015**

Issue : 11 August 2014 - March 2015 Year : 2015


## सप्तमदीक्षान्तसमारोहः




वामतः मञ्चस्थाः डॉ. दशरथजादवः, प्रो.वेम्पटिकुटुम्बशास्त्री, श्रीभूपेन्द्रसिंहचुडासमा, श्रीओ.पी.कोहली, श्रीजसाभाईबारडः, श्रीसी.पी.पटेलः, श्रीकृष्णप्रसादनिरौला

### भारतस्य उन्नत्यर्थं सर्वांगिणविकासार्थं च संस्कृतस्य रक्षणमनिवार्यं तथा ज्ञानपरम्परया सह संस्कृतेतरभाषाणां रक्षणाय संस्कृतमावश्यकम्।- श्री ओ.पी. कोहली

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन दिनाङ्कः १६/२/२०१५ सोमवासरे सप्तमदीक्षान्तसमारोहः समनुष्ठितः। विश्वविद्यालयेन समायोजिते समारम्भेऽस्मिन् गुजरातराज्यस्य माननीयाः राज्यपालमहोदयाः तथा श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलाधिपतयः श्रीओ.पी.कोहली-महोदयाः मुख्यातिथिरूपेण समुपस्थिताः आसन्। गुजरातराज्यस्य शिक्षणमन्त्रिणः माननीयाः श्रीभूपेन्द्रसिंहचुडासमामहोदयाः विशिष्टातिथिपदे विराजमानाः आसन्। गुजरातराज्यस्य कृषिः एवं उड्डयनमन्त्रिणः (राज्यकक्षायाः) श्रीजशाभाईबारडमहोदयाः अतिथिपदे विराजमानाः आसन्। बेलूरमठस्य रामकृष्णमिशनविवेकानन्दविश्वविद्यालयस्य माननीयाः कुलपतयः स्वामिआत्मप्रियानन्दमहोदयाः सारस्वतातिथिरूपेण दीक्षान्तप्रवचनाय निमन्त्रिताः आसन्।

स्वकीये दीक्षान्तप्रवचने राज्यपालमहोदयाः उक्तवन्तः यत् भारतस्य उन्नत्यर्थं सर्वांगिणविकासार्थं च संस्कृतस्य रक्षणमनिवार्यं तथा ज्ञानपरम्परया सह संस्कृतेतरभाषाणां रक्षणाय संस्कृतमावश्यकम्। अस्य सप्तमपदवीदान-समारोहस्य अध्यक्षपदे श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य माननीयाः कुलपतयः प्रो. वेम्पटि कुटुम्बशास्त्रिमहोदयाः आसन्। ये खलु आपद्धर्मपरिपालनपटवः देशकालधर्मानुसारं साध्यक्ष्यं....

**अनु.पञ्चदशे पृष्ठे...**

## विद्यार्थिकल्याणनिधिः

श्रीसोमनाथसंस्कृतविश्वविद्यालये विविधेषु शास्त्रेषु अभ्यासरतानां छात्राणां निःशुल्क आवास-भोजन-व्यवस्था हेतोः विश्वविद्यालयेन ''विद्यार्थिकल्याण-निधिः'' इत्याख्यः कोषः संस्थापितः। अत्र प्रतिष्ठितैः धनाढ्यैः प्रदत्तं दानं सञ्चितं भवति। यस्य व्याजेन (Interest) विद्यार्थीनां कृते भोजनावासादि कोषे ६३,५०,०००/- रूप्यकाणि सञ्चितानि वर्तन्ते। यत्र श्रीसोमनाथसंस्कृतविश्व-विद्यालयेन पञ्चाशत्लक्षं (50 Lacks), बोचासणवासी-अक्षर-पुरुषोत्तम संस्था (BAPS) द्वारा एकादशलक्षं (11 Lacks) तथा श्रीसोमनाथट्रस्ट, (प्रभासपाटण) द्वारा सार्धद्विलक्षं (2.5 Lacks) परिमितानि रूप्यकाणि स्थापितानि। एतदर्थं यः कोऽपि जनः वा संस्था अस्मिन् संस्कृतविश्वविद्यालये शास्त्राभ्यासकर्तॄणां छात्राणां भोजनावासादि व्यवस्था हेतोः उदारतया अनुदानं दातुं शक्नोति।







## राष्ट्रपतिना सम्मानितः कुलपतिमहोदयः



राष्ट्रपतिसम्मानं स्वीकुर्वन् प्रो. वेम्पटिकुटुम्बशास्त्री

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलस्य वेदान्तसाहित्यशास्त्रनिष्णाताः पारम्परिकशास्त्रशोधनदीष्णाः कुलपतयः **प्रो. वेम्पटिकुटुम्बशास्त्रिणः** भारतवर्षस्य राष्ट्रपतेः श्रीप्रणबमुखर्जीमहोदयस्य करकमलाभ्यां **राष्ट्रपतिसम्मानेन** ***(Presidential Certificate of Honour)*** पुरस्कृताः सम्मानिताश्च। कार्यक्रमोऽयं राष्ट्रपतिभवने, देहल्यां सोमवासरे २३/३/२०१५ तमे दिनाङ्के सम्पन्नो जातः।



**Chief Editor**
Prof. Vempaty Kutumba Sastry

**Managing Editor**
Dr. Dashrath Jadav

**Editors**
Dr. Lalit Patel
Dr. Kartik Pandya

**Assistant Editors**
Dr. Satrughna Panigrahi
Shri Janakisharan

**Technical Assistant**
Shri Haresh Kher

News/Reports of events are invited for their publication in **SOMAJYOTIḤ** *(Bi-annual Newsletter of Shree Somnath Sanskrit University)* from affiliated colleges, recognized study centers & approved research centers of Shree Somnath Sanskrit University in Sanskrit, Hindi or English.

News/Reports of events can be sent on following mail/postal address:

**Address:**
**The Editor**
"SOMAJYOTIḤ"
Shree Somnath Sanskrit University
Rajendra Bhuvan Road, Veraval,
Dist. Gir-Somnath, Gujarat–362 266.
(O) 02876-244532

**E-mail:** sssu.veraval@gmail.com

Design & Composition by : Hamir - 98242 76619

Statement about the ownership and other particulars about newspapers
**SOMAJYOTIḤ**
**FORM IV**
(See Rule 8 under Section 5 of the Press and Registration of Book Act,1867)

| | | |
|---|---|---|
| 1. Place of the Publication | : | Shree Somnath Sanskrit University Veraval, Gujarat – 362266 |
| 2. Periodicity of its Publication | : | Bi-annual (Half-Yearly) |
| 3. Printer's Name | : | Jalaram Graphics |
| Nationality | : | Indian |
| Address | : | B/h. Kaveri Hotel, S.T. Road, Veraval, Gujarat-362265 |
| 4. Publisher's Name | : | The Registrar |
| Nationality | : | Indian |
| Address | : | Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266 |
| 5. Editor's Name | : | The Vice-Chancellor |
| Nationality | : | Indian |
| Address | : | Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266 |
| 6. Names & Addresses of Individuals who own the newspaper and partners or shareholders holding more than one percent of the total capital | : | Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266 |

I, Dr. Dashrath Jadav, Registrar (I/c), Shree Somnath Sanskrit University, Veraval, Gujarat hereby declare that the particulars given above are true to the best of my knowledge and belief.

Dr. Dashrath Jadav
Signature of Publisher

# संस्कृतसप्ताहोत्सवः



मञ्चस्थाः विश्वविद्यालयस्य कर्मचारिणः प्राध्यापकाश्च

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन २८/७/१४ तः ३/८/१४ पर्यन्तं 'संस्कृतसप्ताहोत्सवः' भव्यतया समाचरितः।

२८/७/१४ दिनाङ्के उद्घाटनकार्यक्रमे अमेरिकातः समागतः सारस्वतातिथिः श्री पी. चन्द्रशेखरमहाभागः (रीजनल प्लानींग फेडरेशन, कोलम्बस् – ओहियो), वी. जे. राजपूतमहोदयः (अतिरिक्त–जिलाधीशमहोदयः), श्रीराकेशश्रीवास्तवः इत्यादि–महानुभावाः तथा सारस्वताध्यापकाः समुपस्थिताः आसन्।

## संस्कृतसप्ताहोत्सवे आचरिताः स्पर्धाः –

| दिनाङ्कः | स्पर्धानाम | स्पर्धासंचालकः |
|---|---|---|
| ३०–७–१४ | स्तोत्र/श्लोकगानस्पर्धा | डॉ. उमाशंकर झा |
| ३१–७–१४ | रङ्गवल्ली/वक्तृत्वस्पर्धा | श्री जानकीशरणः |
| ०१–८–१४ | रसप्रश्नस्पर्धा | डॉ. दीपेशकतिरा |
| ०२–८–१४ | समूहगानस्पर्धा | डॉ. रमेशचन्द्रशुक्ला |

एतासु स्पर्धासु द्विशतं छात्राः भागं गृहीतवन्तः। विश्वविद्यालयस्य गुरवः निर्णायकत्वेन कार्यं कृतवन्तः। तत्र ये विजेतारः आसन्, तेभ्यः स्पर्धकेभ्यः श्रीस्वामिनारायणमन्दिरे समायोजिते संस्कृतसम्भाषण–शिबिरसमारोपसमारोहे प्रमाणपत्राणि पारितोषिकानि च समर्पितवन्तः मान्याः कुलपतयः, कुलसचिवाः, पाण्डेयमहोदयाः पण्डयामहोदयाश्च। डॉ. महेन्द्रदवेमहोदयः अस्य कार्यक्रमस्य संयोजनं कृतवान्। विजेतृणां नामानि अधोनिर्दिष्टानि सन्ति।

१. **स्तोत्रगानस्पर्धा** I – जानी संहिता जे., II – बाम्भणीया सागर: जे., III – प्रकाशरञ्जनमिश्रा

२. **वक्तृत्वस्पर्धा** I – कार्तिकजानी, II – जिगरभट्टः, बाम्भणिया भावेश:, III – दवे जय:

३. **रङ्गवल्लीस्पर्धा** I – आशिषः जानी, II – जानी निधि:, बारहठ–कञ्चन, अग्रावत हेमाक्षी,
III – चोचा सोनल

४. **प्रश्नमञ्चस्पर्धा** I – राहुलकुमारझा, सतीशभोगायता, II – भट्टजिगरः, बाम्भणीयाभावेश:
III – पुरोहितआकाशः, प्रकाशरञ्जनमिश्रा

५. **समूहगानस्पर्धा** I – त्रिवेदीसंदीपः, जीतेन्द्रभाई, भट्टजिगरः महेशभाई, भोगायतासतीशः, अमृतलालः, जोषीअश्विनः एस्., बाम्भणीयासागरः जेठालालः, पुरोहितआकाशः प्रवीणभाई
II – चौधरी अम्बाबेन गुमानभाई, गामीत संजनाबेन राकेशभाई, पटेल नेहा मनुभाई, गामीत भावना रमेशभाई, गामीत संगीताबेन रमेशभाई
III – राज्यगुरु परेशः डी., खांडैका अरविन्दः एन्., बाम्भणीया भावेशः एम्.

## D.Litt. पदवीं लभमानाः महानुभावाः



डॉ. लक्ष्मेश वी. जोषी



श्रीसत्यानंद वेदवागीशजी



डॉ. साधु श्रुतिप्रकाश दासजी

# ५४ शिबिरात्मक-संस्कृतसम्भाषण-शिबिराभियानान्ते समायोजितः समारोपसमारोहः

२०१४ तमस्य वर्षस्य जुलै-मासस्य चतुर्विंशतितमात् दिनात् ओगस्टमासस्य द्वितीयं दिनं यावत् श्रीसोमनाथसंस्कृतयुनिवर्सिटीद्वारा वेरावल-प्रभास-पाटणे, तत्समीपस्थेषु क्षेत्रेषु च यत् ५४ संस्कृतसम्भाषणशिबिरात्मकम् अभियानम् आयोजितमासीत् तद् ओगस्टमासस्य तृतीये दिने जुनागढमार्गे विद्यमानस्य सुविशालस्य स्वामिनारायणमन्दिरस्य सभागृहे समायोजितेन समारोपसमारोहेण पूर्णतां प्राप्नोत्। समारोहेऽस्मिन् उपसहस्रं संस्कृतमधीतवन्तः शिबिरार्थिनः, अस्य क्षेत्रस्य नैके गणमान्याः जनाः च उपस्थितवन्तः। कार्यक्रमोऽयं मध्याह्ने १:३० वादनादारभ्य सायं ४:३० वादनं यावत् प्रवृत्तः।

कार्यक्रमारम्भे विश्वविद्यालयस्य विद्वद्भिः अध्यापकैः विरचितं गीतं प्रस्तुतवती प्रो. अर्चनादूबे महाभागा। ततश्च शिबिरार्थिभिः बालैः लघुनाटकं समूहगीतं च प्रस्तुतम्। ततः विश्वविद्यालयस्य छात्रैः सुन्दरं गणेशवन्दनापरकं नृत्यं प्रस्तुतम्।




वामतः पूर्वकुलपतयः डॉ. पङ्कजजानी, कुलपतयः प्रो. वेम्पटिकुटुम्बशास्त्री, मुख्यातिथिः स्वामिसच्चिदानन्दः, श्रीसी.पी.पटेलः (Collector), श्रीजसाभाईबारडः (M.L.A.), श्रीजेठाभाईसोलंकी (M.L.A.), श्रीजवेरीभाईठकरारः (President, Gir-Somnath B.J.P.)

ततोऽग्रे कार्यक्रमस्य मुख्यवक्तुः स्वामिसच्चिदानन्दस्य सभागृहे पदार्पणं जातम्। तैः सममेव कार्यक्रमं भूषयितुं समागताः विश्वविद्यालयस्य पूर्वकुलपतयः डॉ. पङ्कजजानी महोदयः, भारतीय-जनता-पार्टी इत्यस्य वरिष्ठः अधिकारी श्रीजवेरीभाईठकरार महोदयः, गीर-सोमनाथ-जनपदस्य समाहर्ता श्री सी. पी. पटेल महोदयः, धारासभ्यः श्री जसाभाई बारड महोदयः, धारासभ्यः श्री जेठाभाई सोलंकी महोदयः च। विश्वविद्यालयच्छात्रैः डॉ. पङ्कज रावलेन च वेदघोषसहितं मान्यवराणां स्वागतं विहितं, तेषां करकमलाभ्यां दीपज्वालनं च कारितम्। ततः विश्वविद्यालयस्य कुलपतिना प्रो. वी. कुटुम्बशास्त्रिणा समागतानां मान्यवराणां वाक्कुसुमैः स्वागतं विहितं, कार्यक्रमस्य प्रास्ताविकं च उक्तम्। स्वीये उद्बोधने कुलपतिना उक्तं ''गुजरातराज्यं नैकेषु विषयेषु प्रथमक्रमे वर्तते। सम्प्रति गुजरातस्थं वेरावल-प्रभास-पाटणनगरम् अपि देशस्य प्रथमं संस्कृतनगरं भवतु इति अस्माकं संकल्पः वर्तते, तदर्थं च वयं प्रयत्नरताः स्मः'' इति। संस्कृतप्रशस्तिं कुर्वता तेन उक्तं यत् संस्कृतं नास्ति चेत् संस्कृतिः नास्ति, संस्कृतं नास्ति चेत् ईश्वरोऽपि नास्ति, यतः ईश्वरं वर्णयत्, परिचाययत् च सर्वमपि अस्माकं साहित्यं संस्कृते एव वर्तते। धर्मः, प्रसादः, नैवेद्यम् इत्यादयः विशिष्टाः संकल्पनाः संस्कृतं विना भाषान्तरद्वारा बोद्धुमेव न शक्यन्ते। अतः अस्माकं संस्कृतेः सम्यक् ज्ञानाय संस्कृतम् अनिवार्यम्। कार्यक्रमे उपस्थितान् नागरिकान् उद्दिश्य तेन उक्तं, ''भवन्तः सर्वे पारम्परिकरीत्या शास्त्राध्ययनमेव कुर्वन्तु इति अपेक्षा नास्ति, अपितु स्वे स्वे क्षेत्रे कार्यरताः सन्तः संस्कृतमपि पठन्तु इति अस्माकम् आशयः, यतो हि संस्कृतं विना भारतीयः जनः पूर्णतां प्राप्तुं न शक्नोति'' इति। कुलपतिभाषणान्ते समागतानां मान्यवराणां पुष्पगुच्छेन, राङ्कवेन, स्मृतिचिह्नेन च सत्क्रिया विहिता।

ततः कार्यक्रमाय विशेषतया समागतेन विश्वविद्यालयस्य पूर्वकुलपतिना श्रीमता पङ्कजजानी महाभागेन उक्तम्, संस्कृतसम्भाषणमाध्यमेन व्यक्तिनिर्माणाय, व्यक्तिनिर्माणद्वारा च राष्ट्रनिर्माणाय वयं कटिबद्धाः स्मः इति। स्वीये उद्बोधने धारासभ्येन श्रीमता जसाभाई बारडमहोदयेनापि संस्कृतस्य महती प्रशस्तिः कृता। गुजरातराज्यस्य भूतपूर्वेण मुख्यमन्त्रिणा श्रीमता नरेन्द्रमोदीमहाभागेन यदा गुजराते प्रथमस्य संस्कृतविश्वविद्यालयस्य स्थापनाय प्रस्तावः कृतः तदा सोमनाथमन्दिरस्य सान्निध्ये एव ईदृशः विश्वविद्यालयः संस्थापितः भवतु इति आग्रहपूर्वं तेन महता कण्ठेन प्रस्तावः समर्थितः आसीत् इति स्वीये भाषणे तेन ज्ञापितम्। जनपदस्य समाहर्त्रा श्रीमता सी. पी. पटेलमहोदयेन स्वीये उद्बोधने कुलपतिना, कुलपतिचरेण च याः अपेक्षाः व्यक्तिकृताः तासां पूरणे स्थानीयशासनस्य सम्पूर्णं समर्थनं सहयोगश्च प्रतिश्रुतः। ततोऽग्रे मञ्चस्थानां महानुभावानां करकमलाभ्यां सोमज्योति-पत्रिकायाः लोकार्पणं जातम्। सभाकार्यक्रमस्य अङ्गतया शिबिरेषु पठितवतां नागरिकाणां प्रतिनिधित्वेन वैद्या श्रीमती निमिषा माखणसा, कृषकः श्री नाजाभाई, बालः ओम् च शिबिरे अध्ययनस्य अनुभवं कथितवन्तः। ततोऽग्रे यस्य वाणीं श्रोतुं सर्वेऽपि समुत्सुकाः आसन् तस्य स्वामिसच्चिदानन्दस्य भाषणं प्रवृत्तम्।

सभाकार्यक्रमानन्तरं रञ्जकाः सांस्कृतिककार्यक्रमाः प्रस्तुताः। सांस्कृतिककार्यक्रमाणां निर्वहणाय द्वौ कार्यकर्तारौ गोपाल उपाध्यायः, दर्शन भट्टः च संस्कृतभारती, गुजराततः विशेषतया आगतौ आस्ताम्। अन्यैः संगत्य ताभ्यां अभिनवपद्धत्या सांस्कृतिककार्यक्रमस्य सञ्चालनं कृतम्। कार्यक्रमे विशेषतया प्रशिक्षिताभिः विश्वविद्यालयस्य छात्राभिः संस्कृतगरबानृत्यं प्रस्तुतम्। तदनु वेरावलस्थेन आर्ट-ओफ्-लिविंग-संस्थायाः कार्यकर्तृगणेन योगस्य महत्त्वं ज्ञापयन् संवादः कश्चित् प्रस्तुतः। अन्ते विश्वविद्यालयस्य छात्राभिः गुर्जरधरे विभासि इति गीतमवलम्ब्य अद्भुतं नृत्यं प्रस्तूय सर्वेषाम् अपि प्रेक्षकाणां मनांसि हृतानि।

कार्यक्रमात् प्राक् नगरे शिबिराभियानेन युगपदेव विश्वविद्यालये संस्कृतसप्ताहः आचरितः। सप्ताहेऽस्मिन् विविधाः स्पर्धाः आयोजिताः आसन्। यैः छात्रैः तत्र विजयः अवाप्तः आसीत्, तेषां प्रमाणपत्रदानेन प्रोत्साहनम् अत्रैव कृतम्। तदनु नगरे सञ्चालिते संस्कृतसम्भाषणशिबिरेषु यैः भागः ऊढः तेभ्यः विश्वविद्यालयपक्षतः प्रमाणपत्रदानाय विविधानां शिबिराणां संयोजकाः क्रमशः मञ्चमाहूताः। आदरणीयैः महानुभावैः तेभ्यः तत्तत्शिबिरेषु भागमूढवतां प्रमाणपत्राणां बन्धाः समर्पिताः।



दक्षिणतः प्रो.विनोदकुमारझा, श्रीहिमांजयपालिवालः, प्रो.वेम्पटिकुटुम्बशास्त्री, छत्तिसगढतः आगतौ महानुभावौ

## गुजरातसर्वकारस्य वनमहोत्सवकार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य सहभागिता



प्रतिवर्षवत् अस्मिन् वर्षेऽपि श्रावणमासे शुक्लपक्षे गुरुवासरे चतुर्थ्यां तिथौ गोंडलसमीपस्थ खोड़लधाम्नि ३१-०७-२०१४ तमदिनाङ्के शक्तिवनमहोत्सव-लोकार्पणकार्यक्रमः गुजरातसर्वकारेण समायोजितः। कार्यक्रमेऽस्मिन् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयकुलपतयः प्रो. वेम्पटीकुटुम्बशास्त्रिणः सादरम् उपस्थिताः आसन्। तथा च डॉ. शत्रुघ्नपाणिग्राही-डॉ. पङ्कजरावलमहोदयाभ्यां सह त्रयोविंशतिच्छात्राः तत्र गत्वा पुरुषसूक्तस्य पाठं, भद्रसूक्तस्य पाठं, भूमिपूजनं, शान्तिपाठं च सम्पादितवन्तः। अस्मिन् पञ्चषष्ठीवनमहोत्सवकार्यक्रमे गुजरातराज्यस्य प्रथममहिला-मुख्यमन्त्रिणः **श्रीमती-आनन्दीबेनपटेलमहाभागाः** भागं गृहीत्वा शक्तिवनमहोत्सवस्य लोकार्पणं कृतवत्यः। गुजरातराज्यस्य विभिन्नेभ्यः प्रान्तेभ्यः जनाः आगत्य कार्यक्रमस्यानन्दं स्वीकृतवन्तः। गुजरातराज्यस्य विकासे वृक्षाणां योगदानमपेक्षते। ईश्वररूपवृक्षाः संरक्षणीयाः पालनीयाश्च।

### शक्तिवनमहोत्सवपञ्चकम्

श्रावणे शुक्लपक्षेऽस्मिन् चतुर्थ्यां गुरुवासरे।
सौराष्ट्रे काग्वडे क्षेत्रे समुद्भूतः वनोत्सवः॥
गुर्जरे वृक्षरक्षायां नारीरक्षणपालने।
महिला मुख्यमन्त्रीत्वात् शक्तिवनसमर्पितम्॥
आसमन्ताद् जनैस्साकं नन्दनं काननोत्सवः।
दीप्ता प्रमुदिता सृष्टिः आनन्द्या (भगिन्या) मुख्यमन्त्रिणा॥
पञ्चषष्ठितमं पर्व खोडले धाम्न्यजायत।
उत्सवो राज्यकक्षायाः शक्तिवनयुतो ध्रुवः॥
वनशक्तिं विदित्वैव वनानि दशपूर्वतः।
एकादशतमं प्रोक्तं वनेषु शक्तिनामतः॥

**रचयिता - डॉ. पङ्कजरावलः**

## स्वतन्त्रतादिवसः

१५/८/२०१४ दिनाङ्के विश्वविद्यालये प्रतिसंवत्सरमिव अस्मिन्नपि संवत्सरे स्वतन्त्रतादिवसस्याचरणं कृतं प्राध्यापकैः छात्रैः कर्मचारिभिः



अधिकारिभिश्च। मान्याः कुलपतिपादाः राष्ट्रियभावनाविषये जीवनमूल्यानां महत्त्वविषये च सर्वान् उपदिष्टवन्तः। संस्कृतेन कथं राष्ट्रस्य निर्माणं भवेत् इत्यस्यापि मार्गदर्शनमकुर्वन् कुलपतिचरणाः। प्रसङ्गेऽस्मिन् छात्राः राष्ट्रगानं कृत्वा ध्वजवन्दनस्य कार्यक्रमं सम्पाद्य सांस्कृतिकं कार्यक्रमं प्रस्तुतवन्तः।

## वैदिकगणितकार्यशाला

२४-८-२०१४ तः २८-८-२०१४ दिनाङ्कपर्यन्तं श्रीसोमनाथसंस्कृतविश्वविद्यालये वैदिकगणितविषयोपरि एका कार्यशाला समनुष्ठिता। इयं कार्यशाला श्रीसोमनाथसंस्कृतविश्वविद्यालयः विद्याभारती चेति अनुष्ठानयोः द्वयोः संयुक्ततत्त्वावधानेन सम्पादिता। अत्र कार्यशालायाः उद्धाटनसत्रे कार्यकारिकुलपतिः तथा वेदविभागाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, श्रीसोमनाथसंस्कृतविश्वविद्यालय-सञ्चालितसंस्कृतमहाविद्यालयस्य आचार्यः डॉ. नरेन्द्रपण्ड्या महोदयः, अहमदाबादस्थ-क्षेत्रीयवैदिकसंगठनसमितेः महामन्त्री श्रीमहेशभाईपतङ्गः, राष्ट्रियस्वयंसेवकसंघस्य कार्यकर्ता वैदिकगणितविशेषज्ञः श्री एम्. राजेन्द्रन्, वैदिकगणितविशेषज्ञः देवेन्द्रराव-देशमुखश्च एते महानुभावाः समुपस्थिताः आसन्।

उद्घाटनसत्रे श्रीमहेशभाईपतङ्गेमहोदयः समुपस्थाय प्रतिभागिनाम् उत्साहवर्धनार्थं प्रेरणां प्रदत्तवान्। कार्यशालायाः तृतीये दिने श्रीमुकेशभाईजादवमहोदयः समुपस्थितः जातः। अनेन कार्यशालायाम् अध्ययन-अध्यापनं निरीक्षितम्। अपराह्णसत्रे माननीयाः कुलपतयः प्रो. वेम्पटिकुटुम्बशास्त्रिमहोदयाः समुपस्थिताः। श्रीमुकेशभाईजादवमहोदयस्य उपस्थितौ विषयानुरूपम् उद्बोधनम् एतैः प्रदत्तम्। श्रीमुकेशभाईजादवमहोदयेन प्रतिभागिनां शङ्कासमाधानं विहितम्। अस्यां कार्यशालायां २६ प्रतिभागिनः उपस्थिताः आसन्। वैदिकगणितविषये प्रमाणपत्रीयपाठ्यक्रमस्य तथा पदविकापाठ्यक्रमस्य निर्माणं विश्वविद्यालय एवं विद्याभारती इत्यनयोः संयुक्ततत्त्वावधाने अतिशीघ्रं भवेत् इति श्रीमुकेशभाईजादवमहोदयस्य प्रशंसार्हा कामना आसीत्।



कार्याशालावसरे अत्र वैदिकगणितपुस्तकानां प्रदर्शिनी आयोजिता आसीत्। वैदिकगणितविषयस्य अभ्यासचक्रायोजनार्थं प्रस्तावाः प्रदत्ताः तथा च आगामिसंवत्सरात् एतस्य अभ्यासचक्रस्य प्रचलनार्थं विचारः कृतः। अन्तिमे समापनसत्रम् आयोजितम्। आवश्यकीयकार्यानुष्ठानार्थं विश्वविद्यालयः सर्वसम्मतिक्रमेण अनुरुद्धः जातः। अस्य कार्यशालायाः संयोजनं डॉ. शत्रुघ्नपाणिग्राही तथा डॉ. कार्तिकपण्ड्या कृतवन्तौ।



## कुलपतिवर्याणां व्याख्यानविशेषः

भारवेः किरातार्जुनीयमहाकाव्यस्यामूलं रसभरसम्भृतस्यात्मनीनतमं सर्वोपायोपादेयतमं न्यक्कृशतान्यविषयरसं रसमनुबुभूषतां सुकुमारमतीनां छात्राणां अध्यापकानां च उपकृतये माननीयकुलपतिवर्यैः प्रो. वी. कुटुम्बशास्त्रिभिः कृतोऽयं किरातार्जुनीयव्याख्यानविशेषरूपः उपक्रमः। सप्ताहे दिनत्रयं मान्याः कुलपतयः विशिष्टया शिक्षणपद्धत्या प्रत्येकं श्लोकं व्याकरण-न्यायादिविषयविशेषेण सह पाठयन्तः मार्गदर्शनं च कुर्वन्तः अध्यापकेभ्यः छात्रेभ्यश्च रसास्वादनं कारयन्ति।

## वाग्वर्धिनिपरिषदः अधिवेशनानि - २०१५

| अधिवेशनम् | दिनाङ्कः | सञ्चालकस्य नाम | सभाध्यक्षः |
|---|---|---|---|
| पञ्चमाधिवेशनम् | २८-०८-२०१४ | राहुलकुमारझा (शास्त्री-२) | डॉ. ललितपटेलः |
| षष्ठाधिवेशनम् | ०४-०९-२०१४ | जानी संहिता (शास्त्री-३) | - |
| सप्तमाधिवेशनम् | ११-०९-२०१४ | प्रकाशकुमारमिश्रा (शास्त्री-२) | प्रो. देवेन्द्रनाथपाण्डेयः |
| अष्टमाधिवेशनम् | १८-०९-२०१४ | जोशीअश्विनः (शास्त्री-३) | डॉ. नरेन्द्रकुमारपण्ड्या |
| नवमाधिवेशनम् | २५-०९-२०१४ | पुरोहितआकाशः (शास्त्री-३) | प्रो. विनोदकुमारझा |
| दशमाधिवेशनम् | ०९-१०-२०१४ | | डॉ. अमृतलालभोगायता |
| एकादशाधिवेशनम् | २२-०१-२०१५ | दवेजयः (शास्त्री-३) | डॉ. नरेन्द्रकुमारपण्ड्या |
| द्वादशाधिवेशनम् | ०५-०२-२०१५ | जानीमयूरः (शास्त्री-३) | डॉ. पङ्कजकुमाररावलः |
| त्रयोदशाधिवेशनम् | २६-०२-२०१५ | जानी संहिता (शास्त्री-३) | डॉ. अमृतलालभोगायता |


निर्माणाधीनम् अध्ययनभवनम्

## अध्यापकानामुपलब्धयः

- **डॉ. नरेन्द्रकुमारपण्ड्यामहोदयेन** ओक्टोबर-नवेम्बर-२०१४ तमे वर्षे वेरावलस्थाः वैद्याः **"श्रीमद्भगवद्गीता-व्याख्यानमालया"** उपदिष्टाः। प्रतिमङ्गलवासरं व्याख्यानमिदं प्राचलत्।
- १२/२/२०१५ तमे दिनाङ्के गान्धीनगरे समायोजिते All Gujarat Integrated Classroom सन्धानमाध्यमेन **डॉ.महेन्द्रदवेमहोदयेन "दशकुमारचरिते षष्ठोच्छ्वासः"** विषये व्याख्यानं दत्तम्।
- १ तः २८/९/२०१४ - **डॉ. शत्रुघ्नपाणिग्राही- डॉ.रमेशचन्द्रशुक्लाभ्यां** गुजराते राजकोटस्थ-सौराष्ट्रविश्वविद्यालये समायोजिते Orientation **कार्यक्रमे** भागं गृहीत्वा उच्चतरशिक्षाभ्यासः सम्पादितः।
- **डॉ. अमृतलालभोगायतामहोदयेन** ओगस्ट-सप्टेम्बर-२०१५ तमे वर्षे वेरावलनगरस्य वैद्यगणाय **"अभिज्ञानशाकुन्तलम्"** नाटकस्य रसास्वादः कारितः। तथा नवम-अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहे च्छात्राणां मार्गदर्शनं कृतम्।

**डॉ. ललितपटेलः (सहायकाचार्यः-साहित्यम्)**

- २७/२/२०१५ - स्व. वी. पी. झाला-केळवणीमण्डल-सञ्चालित-माध्यमिक-उच्चमाध्यमिकविद्यालयस्य वार्षिकोत्सवे सम्मानसमारोहे **विशिष्टातिथिपदमलङ्कृतम्**।
- ३१/८/२०१४ - उमा आर्ट्स एवं नाथीबा कॉमर्स कॉलेज-गान्धीनगरे समायोजिते राष्ट्रियपरिसंवादे सोत्साहं भागं गृहीत्वा **"श्रीमद्भगवद्-गीतोपदेशः साधनानि पद्धतिश्च"** इति विषये शोधपत्रं प्रस्तुतम्।
- २०-२१/९/२०१४-मध्यप्रदेशस्य जबलपुरे संस्कृतभारत्याः प्रवर्तमानायाम् **अखिलभारतीयगोष्ठ्यां** सोत्साहं भागं गृहीतवान्।
- ३१/१०/२०१४ - गुजरातविश्वविद्यालयस्य भाषासाहित्यभवनस्थेन संस्कृतविभागेन अहमदाबादस्थायाः वीरशासनं नामिकायाः संस्थायाः सहयोगेन समायोजितायाम् **अखिलभारतीयसंस्कृतजैनकाव्यसाहित्य-संगोष्ठ्यां** शोधलेखपाठम् अपठत्।

**डॉ. पङ्कजकुमाररावलः (सहायकाचार्यः-पुराणम्)**

- १८/१२/२०१४ - श्रीभास्कराचार्य इन्स्टिट्युट-गांधीनगरे समायोजिते **"ओनलाईन"** व्याख्याने **श्रीमद्भगवद्गीता-क्षेत्रक्षेत्रज्ञयोगस्योपरि** व्याख्यानं प्रदत्तम्।
- २-३-४/१/२०१५-गुवाहाटिनगरे-अखिलभारतीय-प्राच्यविद्या-परिषदाऽऽयोजिते अन्ताराष्ट्रियसंस्कृतसम्मेलने **"श्रीमद्भावगतमहापुराणे भगवद्गीतायां च विभूतियोगः"** इति विषये स्वशोधपत्रं प्रस्तुतम्।
- १५-१६/२/२०१५ -जिल्लाशिक्षण एवं तालिमभवन, जुनागढ (DIET) द्वारा आयोजिते अभ्यासवर्गे **"Resource Person"** रूपेण स्वव्याख्यानं प्रस्तुतम्।
- १/३/२०१५ - उम्बरीग्रामे तपोवनविद्यासंकुले कृतज्ञतासमारोहे **आध्यक्षत्त्वं कृतम्।**

**श्रीजानकीशरणः (सहायकाचार्यः-दर्शनम्)**

- २७-३०/१/ २०१५ -तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठेन आयोजितायां नवम-अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहः इति स्पर्धायां श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्राणां विभिन्नासु प्रतियोगितासु सफलतापूर्वकं **मार्गदर्शनं कृतम्**।
- १४/२/२०१५ - भोपालस्थ-संस्कृत-संस्कृति-संवर्धन-संगठन इत्यनेन आयोजिते अन्ताराष्ट्रियशैक्षिकसम्मेलने **"उपनिषत्सु शैक्षिकदर्शनम्"** इति विषये स्वकीयं शोधपत्रवाचनं Video Conference द्वारा कृतम्।
- १०/३/२०१५ - श्रीसोमनाथसंस्कृतविश्वविद्यालये वाक्यार्थपरिषदः चतुर्थाधिवेशने **"साधनचतुष्टयविमर्शः"** इति विषये स्वकीयं वाक्यार्थं प्रस्तुतम्।
- १३-१५/३/२०१५ -हरिद्वारस्थ-गुरुकुलकाङ्गडीविश्वविद्यालयस्य वेदविभागेन आयोजितायां त्रिदिवसव्यापिन्यां "वैश्विकज्ञानविज्ञान के परिप्रेक्ष्य में वेदों की प्रासङ्गिकता" इति राष्ट्रियसङ्गोष्ठ्यां **"अद्वैतवेदान्ते वेदापौरुषेयत्वविमर्शः"** इति विषये शोधपत्रस्य वाचनं कृतम्।
- १६-१८/३/२०१५ - उत्तराखण्ड-संस्कृत-अकादमी, उत्तराखण्डसर्वकारपक्षतः आयोजितायां त्रिदिवसव्यापिन्यां अखिलभारतीयं संस्कृतशोधसम्मेलनम् इति राष्ट्रियसङ्गोष्ठ्यां **"वेदेषु पर्यावरणचिन्तनम्"** इति विषये स्वकीयं शोधपत्रं प्रस्तुतम्।



अध्यक्षरूपेण विराजमानः प्रो. वेम्पटिकुटुम्बशास्त्री (वामतः चतुर्थः)

## स्वयं शिक्षकदिनम्



श्रीसोमनाथसंस्कृतविश्वविद्यालयेन दिनाङ्क ५/९/२०१४ दिवसः स्वयं शिक्षकदिनरुपेणोत्सवीकृतो यतो हि अस्माकं राष्ट्रपतिवर्यः डॉ.सर्वपल्लीराधाकृष्णन्महोदयोऽतीव सारस्वतो विद्वानवर्तत। तत्स्मृतौ दिवसोऽयं भारतदेशे शिक्षकदिनरूपेण सम्भाव्यते। अस्मद् विश्वविद्यालये सर्वेऽपि छात्राः मिलित्वा केचन तत्र प्राध्यापकरूपेण केचन प्राचार्यरूपेण कुलपतिरूपेण कुलसचिवरूपेण सेवकरूपेण सञ्चालकरूपेण च कार्यं कृतवन्तः। अन्ते च समापनसमारोहः आयोजितः तत्र मान्याः कुलपतयः प्रो. वेम्पटिकुटुम्बशास्त्रिणः प्राध्यापकगणेन सह उपस्थितिं दत्तवन्तः। तैः विद्यार्थिनः प्रबोधिताः तथा च स्वीयगुरूणामपि स्मरणं कृत्वा तेषां कृते आदरो दर्शितः। तत्र च दूरदर्शने प्रधानमन्त्रिणां **श्रीनरेन्द्रमोदीमहोदयानां** प्रवचनमपि सर्वैः श्रुतम्। समाप्ते प्रसङ्गे सति सर्वैः अल्पाहारोऽपि गृहीत्वा 'मधुरेण समापयेत्' इति न्यायेन कार्यक्रमोऽयं सादरं सानन्दं सहर्षञ्च पूर्णतां नीतः।



## नवरात्रमहोत्सवः



प्रतिवर्षानुसारमस्मिन् वर्षेऽपि विश्वविद्यालयपरिसरे ३०-९-२०१४ तमे दिनाङ्के नवरात्रमहोत्सवः आचरितः। तत्र माननीयाः कुलपतयः, कुलसचिवाः, शिक्षकगणः, अधिकारीगणः अन्ये कार्यकर्तारः, सर्वेविद्यार्थिनश्च संस्कृतगरबानृत्यस्यानन्दमनुभूतवन्तः। प्रथमं संस्कृतेन गरबानृत्यं, अनन्तरं गुर्जरगरबागीतेन सह नृत्यम् अकुर्वन् अन्तेवासिनः। अस्मिन् महोत्सवे स्पर्धा अपि अभवत्। तस्यां स्पर्धायां विजेतृणां कृते उपहारोऽपि दत्तः। मध्यावकाशे अल्पाहारस्य व्यवस्थापि आसीत्। अन्ते कुलसचिववर्याः डॉ.दशरथजादवमहोदयाः, प्राचार्याः डॉ.नरेन्द्रपण्ड्यामहोदयाश्च उद्‌बोधितवन्तः उपदिष्टवन्तश्च। तत्र विजेतृणां नामानि इत्थम्-

- भ्रातरः वेशभूषायाम्

  १. जोषीमेहुलः, २. जोषीचिरागः, ३. राज्यगुरुविशालः

- भगिन्यः - वेशभूषायाम्

  १. गरैया भावना, २. जानी संहिता, ३. बामरोटिया अस्मिता

- भ्रातरः क्रीडायाम्

  १. पुरोहितआकाशः, २. जानीऋतुराजः,

- भगिन्यः - क्रीडायाम्

  १. करमुर मित्तल, २. बारैया दृष्टिः, ३. चोचा सोनलः

## राज्यस्तरीयस्पर्धाः

दिनाङ्कः १५/१०/२०१४

संस्कृतसाहित्य-अकादमी (गान्धीनगरम्), राष्ट्रियसंस्कृतसंस्थानम् (नवदेहली) इत्यनयोः संयुक्तोपक्रमे दर्शनं संस्कृतसंस्थानम् (अहमदाबाद) इत्यनेन सहयोगेन तथा च श्रीवरतन्तुसंस्कृतमहाविद्यालये समायोजिता राज्यस्तरीयशास्त्रीयस्पर्धा दिनाङ्क १० तः १२ अक्तुम्बर २०१४ पर्यन्तम् आसीत्।

तत्र श्रीसोमनाथसंस्कृतविश्वविद्यालय सञ्चालितः संस्कृतमहाविद्यालयस्य एकं दलं विविधासु स्पर्धासु भागं ग्रहीतुं श्रीभागवतविद्यापीठ-सोला-अहमदाबादम् अगच्छत्। यत्र अष्टशास्त्रभाषणस्पर्धाः सप्तशलाकास्पर्धाः धातुपाठ-कण्ठपाठ-समस्यापूर्ति-अक्षरश्लोकीस्पर्धाश्चासन्। विविधेभ्यः महाविद्यालयेभ्यः आहत्य १५१ छात्राः प्रायः आसन्। अस्माकं महाविद्यालयात् साहित्य-न्याय-व्याकरण-धर्मशास्त्रे भाषणस्पर्धायां तथा च पुराणशलाकाप्रतियोगितायां, द्वौ छात्रौ धातुपाठसूत्राष्टाध्यायी-कण्ठपाठस्पर्धायां चास्ताम्। एकश्च शास्त्रार्थविचारे कालनिर्णयं कृतवान्। तस्य कालनिर्णयः द्वितीयस्थाने आसीत् द्वितीयस्थानं च तेनालभत्। "**भारतराष्ट्रस्य स्वच्छतां निरीक्ष्य देवाः अपि इर्ष्यान्विताः भवन्ति**" इत्यासीत् समस्यापूर्तिविषयः।

इत्थं श्री सोमनाथविश्वविद्यालयात् छात्राः एकश्च प्राध्यापकः डॉ.पङ्कजकुमाररावलः मार्गदर्शकरूपेण सहैवासीत्। तत्र च प्राध्यापकेनानेन समापनकार्यक्रमस्य सभासञ्चालनं कृतम्। अतः सः धन्यवादार्हः। छात्राश्च सर्वथा अभिनन्दनार्हाः।

अत्र राज्यस्तरीय स्पर्धायां 'दर्शनम्' संस्कृत-संस्थानेन विजयवैजयन्ती प्राप्य समग्र स्पर्धायां सान्दिपनी संस्थानम् श्री बाबडेश्वरसंस्कृतमहाविद्यालयः द्वितीयस्थानमध्यगच्छत्। तृतीयस्थाने च यजमान संस्था श्रीवरतंतु सं.म.वि. भागवत-विद्यापीठमासीत्। इतः परमत्र राज्यस्तरे येन-प्रथमः पुरस्कारः प्राप्तः सः छात्रः राष्ट्रस्तरे गुर्जरराज्यस्य गौरवं वर्धयितुं जिगमिषति। तदर्थं तादृशान् सर्वान् प्रथमपुरस्कारसंप्राप्तान् छात्रान् शुभकामनाभिः श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य माननीयाः कुलपतयः प्रो.वेम्पटिकुटुम्बशास्त्रिणः सभाजयन्ति संप्रेरयन्ति च।

## Inter University West Zone Youth Festival - 2014

१९/११/२०१४ दिनाङ्कतः २१/११/२०१४ यावत् महर्षिदयानन्द-सरस्वतीविश्वविद्यालये (अजमेर-राजस्थाने) युवकमहोत्सवस्य आयोजनमभवत्। तत्र श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य नवछात्रैः भागो गृहीतः। सर्वैः अपि छात्रैः सान्त्वनपुरस्कारोपलब्धिः कृता। तथा च पण्ड्याकृणालः **'रंगोली' स्पर्धायां द्वितीयं स्थानमधिगत्य** विजयी जातः। अत्र विश्वविद्यालयपक्षतः दलमार्गदर्शकरूपेण डॉ. अमृतलालः भोगायता अगच्छत्। सर्वेभ्यः अभिनन्दनानि।



## श्रद्धाञ्जलिसभा



**नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।**
**न चैनं क्लेदयन्त्यापो न शोषयति मारुतः।।**

श्रीस्वामीहीरापुरीजीसंस्कृतमहाविद्यालयस्य अध्यक्षाः महन्तश्रीशिवरामगिरिजी श्रीरामपुरीजी गुरुचरणाः दिनाङ्कः २०/१२/२०१४ (मार्गशीर्ष-कृष्णपक्ष-चतुर्दशी) शनिवासरे रात्रौ ९:०० (नववादने) शिवलोकं प्राप्ताः। तथा च मार्गशीर्षकृष्णपक्षे अमावस्यायां तिथौ रविवासरे अपराह्ने त्रिवादने सेवकैः समाधिः प्रदत्तः। इमे गुरुचरणाः संस्कृतमातुः सेवायै समर्पिताः आसन्। संस्कृतजगति तेषां क्षतिः सर्वदा अपूर्णा भविष्यति।

अस्मिन् दैवसंयोगेनागतसमये श्रीस्वामीहीरापुरीजीसंस्कृतमहाविद्यालयस्य सम्पूर्णपरिवारोऽत्यन्तं दुःखमनुभवति। कैलासवासी महंतश्रीशिवरामगिरीजी श्रीरामपुरीजी गुरुचरणानामात्मनः सायुज्यप्राप्त्यै श्रीस्वामीहीरापुरीजी-संस्कृतमहाविद्यालयस्य परिसरे २४/१२/२०१४ दिनाङ्के बुधवासरे श्रीओमानन्दगिरिजी महाभागानामाध्यक्षपदे एका श्रद्धाञ्जलिसभा आयोजिता।

अस्यां श्रद्धाञ्जलिसभायां नीलकण्ठअखाडायाः साधवः सन्यासिनः, अन्यमन्दिरात् समागताः गादीपतयः, अस्य महाविद्यालयस्य भूतपूर्वप्रधानाचार्याः, वर्तमान् प्रधानाचार्यः, अध्यापकाः, छात्राश्च, श्रीसरयूरामानन्दसंस्कृत-महाविद्यालस्य प्रधानाचार्यः, असारवाविद्यालयस्य आचार्याः, समस्तकर्मचारिगणाः, असारवाग्रामात् समागताः ग्रामजनाः समुपस्थितारासन्।

सर्वे महानुभावाः सम्मिल्य द्विनिमेषं यावत् मौनं धारयित्वा पुष्पैः वाक्पुष्पैश्च श्रद्धाञ्जलिं दत्तवन्तः।

-डॉ. रा. प्रा. शुक्ल

## गणतन्त्रदिवसः



२६/१/२०१५ तमे दिनाङ्के विश्वविद्यालये प्रतिवर्षमिव अस्मिन्नपि वर्षे गणतन्त्रदिवसस्याचरणं प्राध्यापकैः छात्रैः कर्मचारिभिः अधिकारिभिश्च कृतम्। मान्याः कुलपतिचरणाः ध्वजवन्दनं कृतवन्तः। तदनन्तरं विश्वविद्यालयछात्रैः छात्राभिश्च सांस्कृतिकः कार्यक्रमः प्रस्तुतः। मान्याः कुलपतिपादाः वेदान्तदृष्ट्या राष्ट्रियभावनाविषये जीवनमूल्यानां महत्त्वविषये च सर्वान् उपदिष्टवन्तः।

## भोपालस्थान्ताराष्ट्रियपरिसंवादः

भोपालस्थ-संस्कृत-संस्कृति-संवर्धन-संगठन इत्यनया संस्थया फरवरीमासस्य १४-१५ दिनाङ्कयोः द्विदिवसीयस्य अन्ताराष्ट्रिय-शैक्षिक-सम्मेलनस्य आयोजनमकारि। सम्मेलनस्यास्य मुख्यः विषयः ''वर्तमान शिक्षा के गुणवत्ता संवर्धन में भारतीय संस्कृति का योगदान'' इत्यासीत्। अस्मिन् सम्मेलने श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य एकादश प्राध्यापकाः विडियो-कॉन्फेरेन्स् माध्यमेन भागं गृहीत्वा शिक्षासम्बद्धान् उत्तमान् विषयान् प्रास्तुवन्। एतानि शोधपत्राणि विद्वद्भिः प्रशंसितानि।

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे आयोजिते अस्मिन् विडियो-कॉन्फेरेन्स् कार्यक्रमे व्याकरणसङ्कायाध्यक्षेन प्रो. विनोदकुमारझामहोदयेन आध्यक्षीयं स्थानम् अलङ्कृतम्। कार्यक्रमस्यादौ वेदविभागे सहायकाचार्यः डॉ. शत्रुघ्नपाणिग्राही वैदिकं मङ्गलाचरणमकरोत्। तदनु वेदान्तविभागे सहायकाचार्यः श्रीजानकीशरणः सर्वान् स्वागतीकृत्य कार्यक्रमस्यास्य सञ्चालनमकरोत्।

## सारस्वतसन्माननम्

भारतीयतत्त्वज्ञानमन्दिरसंचालित-श्रीसोमनाथसंस्कृतयुनिवर्सिटीवेरावल-मान्यसंस्कृतसंशोधनकेन्द्र-मोडासाद्वारा, वेदपण्डितः उत्स्वलालबालकृष्ण-पौराणिकस्य सारस्वतसन्माननम् आयोजितम् आसीत्। अस्मिन् कार्यक्रमे गुजरातस्य लब्धप्रतिष्ठकविः श्री डॉ. मणीलाल ह. पटेलः, डॉ. लवजीभाईपटेलः (निवृत्तः आचार्यः), प्रथितः नाट्याचार्यः श्री अरविंदभाईपण्ड्या(निवृत्तः आचार्यः), सुश्री चन्द्रकान्ताबेन पटेल (लेखिका, शिक्षिका)च उपस्थिताः आसन्। तेषां वस्त्रप्रदानेन पुष्पगुच्छेन च सन्मानपूर्वकं स्वागतम् अभवत्। तस्मिन् प्रसङ्गे डॉ. विनोदभाईपुराणीमहोदयेन महानुभावानां परिचयं प्रदाय स्वागतं कृतम्। श्रीकिशोरभाईशुक्लमहोदयः प्रखरतापरीक्षापुरस्कारस्य प्रमाणपत्रस्य च वितरणव्यवस्थां कृतवान्। अस्मिन् अवसरे डॉ. सनतकुमाररंगाटीयामहोदयस्य प्रेरकोपस्थितिः आसीत्।

## मन्त्रजागरणम्

वेदविद्यायाः तथा च वैदिकसाहित्यग्रन्थानां परिचयार्थं शरदपूर्णिमायाः शुभ्रज्योत्स्नायुक्ते आह्लादकवातावरणे वेदमन्त्रोच्चारण-स्वरप्रणालिकापरिचयप्राप्तये **मन्त्रजागरणं** नाम कार्यक्रम आयोजित आसीत्। ऋग्वेद-यजुर्वेद-सामवेद-अथर्ववेदानां गानस्वरपद्धतिः भिन्ना भवति। तत्र उच्चारणपद्धतेः स्वरपद्धतेः च परिचयः पठनं चाभवत्। वेदपण्डितः श्रीकिरीटभाईमहोदयः अत्र मार्गदर्शनम् अकरोत्।

## वार्तापत्रेषु विश्वविद्यालयः


GUJARAT
A lighthouse on the Arabian seashore


રાજ્યપાલ હસ્તે પદવી એના


ભારતની ઉન્નતિ, સર્વાંગી વિકાસ માટે સંસ્કૃત ભાષાનું રક્ષણ અનિવાર્ય : રાજ્યપાલ કોહલી
સંદેશ

# द्वितीय-अखिलभारतीयसंस्कृत-विश्वविद्यालययुवमहोत्सवः


समग्रे भारतवर्षे श्रीसोमनाथसंस्कृतविश्वविद्यालय-वेरावलस्य द्वितीयं स्थानम्

०६-०१-२०१५ तः ०९-०१-२०१५ दिनाङ्कं यावत् अखिलभारतीय-संस्कृतविश्वविद्यालयानां द्वितीयः युवमहोत्सवः त्रिपुरायाः राजधान्यां अगरतलायां सञ्जातः। तस्मिन् भारतस्य महत्तमविश्वविद्यालयाः भागम् अगृह्णन्। महोत्सवेऽस्मिन् शैक्षिक-क्रीडा-योगासनादि-स्पर्धाः आसन्। सर्वासु स्पर्धासु श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्रैः गुजरातराज्यस्य प्रतिनिधित्वं कृतम्। आहत्य पञ्चचत्वारिंशत् (४५) स्पर्धासु अस्य विश्वविद्यालयस्य छात्राः चतुष्चत्वारिंशत् (४४) पदकानि प्राप्तवन्तः। तेषु पदकेषु सप्त (०७) सुवर्णपदकानि, अष्टाविंशतिः (२८) रजतपदकानि, नव (०९) कांस्यपदकानि प्राप्तानि सन्ति। सम्पूर्णस्पर्धायां विश्वविद्यालयः उत्कृष्टं प्रदर्शनं कृत्वा सम्पूर्णे भारतवर्षे द्वितीयं स्थानमलभत्। श्रीसमोनाथसंस्कृतविश्वविद्यालयस्य क्रीडाध्यापकः श्रीजयेशमुंगरा अपि अध्यापकानां क्रीडा-स्पर्धायां तृतीयं स्थानमलभत्। तत्र गताः मार्गदर्शकाः गुरवः, प्रतिभागिनः विजेतारश्च छात्राः धन्यवादार्हाः अभिनन्दनार्हाः इति।

## त्रिपुरायुवकमहोत्सवे विजेतृणां/भागार्थीनां नामानि

१. व्यास हिरेन जस्मिनभाई – योगः (द्वितीयः)
२. चौधरी भाविन मुकेशभाई – १०० मी. (द्वितीयः), चक्रक्षेपणम् (द्वितीयः), २०० मी. (द्वितीयः)
३. गामीत विरल नवीनभाई – १५०० मी. (द्वितीयः)
४. भट्ट मेहुल उपेन्द्रभाई – बेडमिन्टन युगल (द्वितीयः), एकक (द्वितीयः)
५. पाठक अंकुर हर्षदभाई – मल्लयुद्धः (तृतीयः), बेडमिन्टन युगल (द्वितीयः)
६. महेता हर्ष पंकजभाई – ४०० मी. (तृतीयः)
७. चौधरी दिव्यांग अर्जुनभाई – कुन्तकक्षेपणम् (तृतीयः)
८. खांडेका अरविंद अंबारामभाई – मल्लयुद्धः (द्वितीयः)
९. गोर प्रणव रश्मिकान्तः – मल्लयुद्धः (तृतीयः)
१०. जोषी जयदेव डायारामः – मल्लयुद्धः (द्वितीयः)
११. खांडेका अरविंद मगनभाई – मल्लयुद्धः (द्वितीयः)
१२. रावल सचिन प्रद्युमनभाई – चतुरङ्गम् (द्वितीयः)
१३. भट्ट व्रजेश जयदीपभाई – गोलकक्षेपणम् (प्रथमः)
१४. करमुर मित्तल डाह्याभाई – योगः (प्रथमः), संघनृत्यम् (द्वितीयः)
१५. गामीत कल्पनाबेन नटुभाई – १०० मी. (द्वितीयः), ५०० मी. (द्वितीयः)
१६. चौधरी सुनिता चंपकभाई – २०० मी. (द्वितीयः)
१७. पटेल नेहा मनुभाई – उच्चकूर्दनम् (द्वितीयः), बेडमिन्टन एकक (द्वितीयः), बेडमिन्टन युगल (द्वितीयः)
१८. बारिया दृष्टि जगदीशभाई –संघनृत्यम् (द्वितीयः), बेडमिन्टन (द्वितीयः)
१९. कोंकणी शर्मिला बालुभाई – चतुरङ्गम् (द्वितीयः)
२०. गामीत पारूबेन नवलीयाभाई – दीर्घकूर्दनम् (द्वितीयः)
२१. गामीत शीला शीवाजीभाइ – चक्रक्षेपणम् (द्वितीयः), गोलकक्षेपणम् (द्वितीयः)
२२. शीलु निकुल शांतीलाल – शास्त्रीयगायनम् (तृतीयः)
२३. त्रिवेदी धवल परसोत्तमभाई – शास्त्रीयवादनम् (प्रथमः)
२४. जोषी कुश धर्मेशभाई – सुभाषितकण्ठपाठः (द्वितीयः), संस्कृतगीतम् (द्वितीयः)
२५. जोषी सागर धर्मेन्द्रभाई – नृत्यम् (द्वितीयः)
२६. ओडिच धवल देवराजभाई – सुभाषितकण्ठपाठः (तृतीयः)
२७. जोषी हरेश धनजीभाई – वाद-विवाद-विपक्षः (प्रथमः), शीघ्र वक्तृत्वः (द्वितीयः)
२८. व्यास ऋषि निलेशभाई – वाद-विवाद-पक्षः (प्रथमः)
२९. बांभणिया सागर जेठालाल – प्रश्नमञ्चः (प्रथमः)
३०. भट्ट जिगर महेशभाई – प्रश्नमञ्चः (प्रथमः), साहित्यरचना (तृतीयः)
३१. पंडया मिलन जगदीशभाई – आशुचित्रम् (द्वितीयः), व्यंग्यचित्रम् (तृतीयः)
३२. पंडया कृणाल कमलेशभाई – रंगोली (प्रथमः)
३३. भट्ट राज परिमलभाई – एकपात्राभिनयम् (तृतीयः)
३४. वाघेला क्रिष्ना रमेशभाई – संघनृत्यम् (द्वितीयः)
३५. उजेणिया हिना रसिकभाई – संघनृत्यम् (द्वितीयः)
३६. पंडया जिज्ञा परेशभाई – संघनृत्यम् (द्वितीयः)

**(आहत्य – ४४ पदकानि)**

(०७ – स्वर्णपदकानि) (२८ – रजतपदकानि) (०९– कांस्यपदकानि)

**मार्गदर्शकाः**

– प्रो. अर्चनादुबे – डॉ. अमृतलालभोगायता
– डॉ. पङ्कजकुमाररावलः – श्री जयेशमुंगरा


श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य मुख्यभवनम्

## विद्यावारिधिः (Ph.D.) पदवीं लभमानाः शोधर्थिनः (दिनाङ्कः १६/२/२०१५)

| क्रम | नाम | मुख्यविषयः |
|---|---|---|
| १. | गौतम हरिहर लक्ष्मीप्रसाद | वेदः |
| २. | पाठक हितेषकुमार बालकृष्ण | वेदः |
| ३. | ओडेदरा देवजी विठ्ठलभाई | पुराणम् |
| ४. | महेता प्रविणकुमार जेठालाल | वेदः |
| ५. | पंचोली नरेन्द्र हरिप्रसाद | वेदः |
| ६. | जानी अजयकुमार हिम्मतलाल | पुराणम् |
| ७. | शुक्ल निशिताबेन शैलेषकुमार | साहित्यम् |
| ८. | जोषी अजय लालजीभाई | पुराणम् |
| ९. | पंड्या प्रविणकुमार अमृतलाल | पुराणम् |
| १०. | देसाई दयाबेन मनुभाई | वेदः |
| ११. | भोजवीया घनश्याम जेरामभाई | साहित्यम् |
| १२. | राजगोर मयूरचंद्र भरतभाई | पुराणम् |

## पुरस्कारेण सभाजिता अस्मच्छात्राः




शोभायात्रायाम् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य च्छात्राः प्राध्यापकाश्च

तिरुपतिस्थराष्ट्रिय-संस्कृतविद्यापीठेन (मानित-विश्वविद्यालयेन) जनवरी-मासस्य २७ दिनाङ्कात् ३१ दिनाङ्कं यावत् नवमअखिल-भारतीयसंस्कृतच्छात्रप्रातिभसमारोहः समायोजितः, यत्र द्वाविंशत्यधिकानुष्ठानानां पञ्च-सप्तत्यधिकचतुश्शतं छात्राः भागमगृह्णन्। प्रातिभसमारोहेऽस्मिन् वेद-व्याकरण-न्याय-वेदान्त-मीमांसा-ज्योतिष-धर्मशास्त्र-पुराणेतिहासादिविषयैः सह रसप्रश्नः, समस्यापूर्तिः, अन्त्याक्षर्यादि शैक्षिकस्पर्धासु तथा च संस्कृत-एकाङ्किका-जनपदनृत्य-संस्कृतगीतगायनादि सांस्कृतिकस्पर्धासु श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य चतुर्दशच्छात्राः भागमगृह्णन्। तत्र एतेन छात्रग्रामेण सर्वासु स्पार्धासु उत्कृष्टं प्रदर्शनं प्रदर्शितम्। एतस्य विश्वविद्यालयस्य आचार्यद्वितीयवर्षीयच्छात्रः जानीकार्तिकः वेदभाषणस्पर्धायां सान्त्वनापुरस्कार-मलभत्। अस्मच्छात्रैः "**वेदेषु निहितं मानवजीवनम्**" इति एकाङ्किका-स्पर्धायां तृतीयस्थानं प्राप्तम्। एकाङ्किकेयं तत्रत्यमहानुभावैः, दर्शकैः, निर्णायकैश्च भृशं प्रशंसिता। एतासु स्पर्धासु श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य चतुर्दश छात्राः भागमगृह्णन्। एतस्य छात्रसमवायस्य मार्गदर्शनं वेदान्तविभागे सहायकाचार्यः श्रीजानकीशरणः पुराणविभागे सहायकाचार्यः डॉ. अमृतलाल-भोगायता अकुरुताम्।



## Vibrant Gujarat - 2015



वामतः डॉ. दशरथजादवः, प्रो. वेम्पटिकुटुम्बशास्त्री एवं श्रीमती शास्त्री

गुजरातसर्वकारेण प्रति द्विवर्षान्तरं "Vibrant Gujarat" इत्याख्यः कार्यक्रमः सगौरवं सोत्साहं च परिपाल्यते। एतस्मिन् संवत्सरेऽपि अस्य कार्यक्रमस्य समायोजनं जनवरीमासस्य सप्तदिनाङ्कतः त्रयोदशदिनाङ्कं यावन्महता सम्भ्रमेण जातम्। "Vibrant Gujarat Global Summit-2015" इत्युपक्रमे समायोजितेषु विविधेषु विश्वविद्यालयप्रदर्शिनी-कार्यक्रमेषु श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्रदर्शिनी विशिष्टा प्रशंसनीया दर्शनीया सर्वाङ्गिणविकासचित्रप्रस्तोत्री ज्ञानविज्ञानकलासाहित्यप्रभृतिपुरस्कर्त्री चासीत्। संस्कृतद्वारा सर्वाङ्गिणविकासं प्रदर्शयन्ती प्रदर्शिनीयं नितरां विद्वद्भिः संस्कृतानुरागिभिः अवलोकनकर्तृभिश्च प्रशंसनीया बभूव। माननीय-शिक्षणमन्त्रिणः **श्रीभूपेन्द्रसिंहचुडासमाजी** एवञ्च माननीयराज्यशिक्षणमन्त्रिण्यः **श्रीवसुबेनत्रिवेदीजी** अधिकारिभिः सह प्रदर्शिनीं वीक्ष्य साधुवादान् समर्पितवन्तः।

अस्यां प्रदर्शिन्यां चित्ताकर्षकचित्रेण सह षोडशसंस्काराणां, अष्टादशपुराणानां, संस्कृतसाहित्ये प्रतिपादितवैज्ञानिकतत्त्वानां, ज्योतिषशास्त्रस्य मौलिकतत्त्वानां, वेदेषूपलब्धवैज्ञानिकनैतिकमूल्यबोधानां, साहित्यशास्त्रस्य नानाविधचित्रबन्धानां, न्याय-दर्शन-विषयक-वैज्ञानिकतथ्यानां, प्राचीनार्वाचीनज्ञान-विज्ञान-शैक्षिकविषयाणां, प्राचीनहस्तप्रतविज्ञानस्य तत्साधनानां च प्रदर्शनेन गुजरातप्रान्तस्य बहिष्ठाश्च जनाः उद्बुद्धाः शिक्षिताश्च। प्रथमे हि दिवसे "Holistic Development Through Sanskrit" इति विषयमुररीकृत्य माननीय-कुलपतिवर्याणां प्रो. वेम्पटिकुटुम्बशास्त्रिणां प्रवचनं श्रुत्वा तु भूरि भूरि प्रशंसाम् अकुर्वन् सर्वे जनाः।

अस्य कार्यक्रमस्य समायोजने विश्वविद्यालयस्य कुलपतिचरणानां कुलसचिवपादानां च मार्गदर्शनं योगदानं चाभिनन्दनीयम् आसीत्। बहवः उच्चपदाधिकारिणः, मान्याः मन्त्रिणः, पाश्चात्यदेशेभ्यः आगताः बुद्धिजीविनः इमां प्रदर्शिनीं वीक्ष्य भूयो भूयः प्रशंसां कृतवन्तः तथा स्वकीयेन लिखितमन्तव्येन अस्मान् प्रचोदितवन्तः। ऐन्द्रजालिकचतुष्कोणः तथा च चतुरङ्गस्याश्वोपरि श्लोकारोहणं तु वृत्तपत्रेष्वपि प्रशंसाम् अवाप्नोत्। अस्य कार्यक्रमस्य संयोजने विशेषतः विश्वविद्यालयस्य प्राध्यापकानां कर्मचारिणां च महनीयं योगदानमासीत्। तेषामेव यत्नेन बुद्धिवैभवेन ज्ञानप्रदर्शनेन च चतुराशीतिः (८४) प्रदर्शिनीभ्यः विश्वविद्यालयस्येयं प्रदर्शिनी **प्रथमं स्थानं** प्राप्नोत् इति धन्यवादार्हम्। अस्य कार्यक्रमस्य संयोजकौ डॉ. ललितपटेलः तथा डॉ. कार्तिकपण्ड्या आस्ताम्।



# सोमनाथस्य सान्निध्ये सम्पन्नं गीर-सोमनाथ-जनपद-संस्कृत-सम्मेलनम्

अस्मिन् वर्षे संस्कृतभारतीद्वारा भारतस्य विभिन्नेषु ५०० जनपदेषु संस्कृतसम्मेलनानि आयोज्यमानानि सन्ति। अस्यामेव शृङ्खलायां २०१५ तमस्य वर्षस्य फेब्रुअरीमासस्य १५ दिनाङ्के प्रभासक्षेत्रस्थस्य सुविख्यातस्य सोमनाथमन्दिरस्य प्राङ्गणे गीर-सोमनाथ-जनपदस्य संस्कृतानुरागिणां विशालं स्नेहसम्मेलनं सम्पन्नम्। सम्मेलनमेतत् श्रीसोमनाथ-संस्कृत-युनिवर्सिटी, श्रीसोमनाथ-ट्रस्ट, अन्यासां च संस्कृताभिमानिनां धार्मिक-शैक्षणिक-सामाजिक-संस्थानां साहाय्येन संस्कृतभारतीद्वारा आयोजितमासीत्।




वामतः डॉ.महादेवप्रसादमहेता, प्रो.वेम्पटिकुटुम्बशास्त्री, श्रीदिनेशकामतः, श्रीओ.पी.कोहली, राज्यपालभगिनी, श्रीजसाभाईबारडः, श्रीजे.डी.परमारः, श्रीसी.पी.पटेलः

कार्यक्रमस्यास्य अङ्गतया फेब्रुअरीमासस्य षष्ठादेव दिनात् विशेषतया प्रशिक्षिताः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्राः जनपदस्य प्रत्येकं तालुकाक्षेत्रम् अगच्छन्। तैः तत्र तत्र आयोजितेषु संस्कृतसम्भाषणशिबिरेषु पाठनं कृतम्। १५ दिनाङ्के आयोजिते जनपद-संस्कृत-सम्मेलने जनपदस्य प्रत्येकस्मात् तालुकाक्षेत्रात् सहस्राधिकाः संभाषणशिबिरच्छात्राः, जनपदस्य प्रतिष्ठिताः नागरिकाः, प्रमुखाः शासकीयाः कर्मचारिणः, महाविद्यालयीयाः छात्राः, श्रेष्ठिनः च भागं वोढुं सोत्साहं समुपस्थिताः।

सम्मेलनस्यास्य आयोजने सोमनाथमन्दिरस्य प्राङ्गणे एव स्थानव्यवस्था, भव्यस्य मण्डपस्य व्यवस्था, ध्वन्यादिव्यवस्था च श्रीसोमनाथन्यासेन कृता आसीत्। कार्यक्रमोऽयं मध्याह्ने २:०० वादनात् सायं ७:०० वादनं यावत् प्रवृत्तः। अस्मै कार्यक्रमाय विशेषतया संस्कृतविज्ञानप्रदर्शिनी, संस्कृतशास्त्रगौरवप्रदर्शिनी, संस्कृतवस्तुप्रदर्शिनी, संस्कृतविकिपीडियाप्रदर्शिनी च सज्जीकृता आसीत्। जनपदस्य समाहर्त्री श्रीमता सी. पी. पटेल महाभागेन आसां प्रदर्शिनीनाम् उद्घाटनं कृत्वा सम्मेलनस्य प्रारम्भः कृतः। ततश्च सर्वैरपि



सहभागिभिः प्रदर्शिन्यः अवलोकिताः, संस्कृतभारत्या प्रकाशितं सरलसंस्कृतसाहित्यं च दृष्टम्।

ततः परं नैकैः गणमान्यैः जनैः समं गुजरातराज्यस्य माननीयः राज्यपालः श्री. ओ. पी. कोहली महाभागः औपचारिकीं सभाम् अलङ्कृतवान्। संस्कृतभारत्याः शिबिरेषु अधीत्य अचिरादेव संस्कृतसम्भाषणे नैपुण्यमवाप्तवती स्त्रीरोगतज्ञा वैद्या श्रीमती निमिषा माखणसा सभायाः संचालनं कृतवती। विख्यातस्य कथाकारस्य श्रीमतः महादेव-प्रसाद-महेता-महाभागस्य आध्यक्षे स्वागतसमित्याः सदस्यैः वाचा, फल-पुष्प-राङ्कवादिभिश्च महानुभावानां स्वागतं विहितम्। डो. ललित पटेल महोदयेन कार्यक्रमस्य प्रास्ताविकं कृतम्। ततः सम्प्रति यस्मै संस्कृतसेवायै राष्ट्रपतिपुरस्कारः समुद्घोषितो वर्तते तस्य श्रीसोमनाथसंस्कृतविश्व-विद्यालयस्य कुलपतेः श्रीमतः प्रो. वेम्पटिकुटुम्बशास्त्रिणः विशिष्टा सत्क्रिया माननीयेन राज्यपालेन विहिता।

ततः श्रीसोमनाथन्यासस्य न्यासी संस्कृतविद्वान् श्रीमान् जे. डी. परमारः स्वीये उद्बोधने संस्कृतस्य प्रशस्तिं कुर्वन् संस्कृतप्रचाराय श्रीसोमनथन्यासस्य कटिबद्धतां प्राकटयत्। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्रतिष्ठापनाय श्रीसोमनाथन्यासद्वारा तेन महान् उद्यमः विहितः आसीत् इति तेन स्वीये उद्बोधने ज्ञापितम्।

ततः परं श्रीसोमनाथ-संस्कृतविश्वविद्यालयस्य कुलपतिना श्रीमता प्रो. वेम्पटिकुटुम्बशास्त्रिणा संस्कृतप्रचाराय संस्कृतभारत्या क्रियमाणं कार्यं बहुशः श्लाघितम्। पुरा इयमेव संस्कृता वाणी मनुष्यैः उच्यमानासीत् इति वाल्मीकि-रामायणे वर्णितं सीता-हनुमतोः संवादस्य प्रसङ्गं श्रावयता तेन प्रतिपादितम्।

सम्मेलनेऽस्मिन् गुजरात-राज्यस्य कृषिमन्त्री नागरिकौड्डयनमन्त्री च श्रीमान् जसाभाई बारडः अपि उपस्थितः आसीत्।



सः संस्कृतस्य महान् समर्थकः वर्तते। संस्कृतस्य उन्नत्या एव राष्ट्रस्य उन्नतिः भवितुम् अर्हति इति तेन उक्तम्। पुरा गुजरात-राज्ये संस्कृतविश्वविद्यालयस्य स्थापना भवतु इति प्रस्तावः तेन मन्त्रालये महता कण्ठेन समर्थितः आसीत् इति तेन स्वीये भाषणे ज्ञापितम्।

सम्मेलने मुख्यवक्ता आसीत् संस्कृतभारत्याः अखिलभारतीयः संघटनमन्त्री श्रीमान् दिनेश कामतः। तेन स्वीये भाषणे उक्तं यत् – संस्कृतभाषा स्वभावतः एव भारतस्य राष्ट्रभाषा अस्ति। संस्कृताध्ययनस्य अभावे एव इतराः भारतीयभाषाः भ्रश्यमानाः सन्ति। अतः भारतीयसंस्कृतेः संरक्षणाय संस्कृतस्य रक्षणम् अत्यावश्यकम्।

दिनेशकामतमहोदयस्य भाषणानन्तरं संस्कृतस्य विकासाय संरक्षणाय च सज्जीकृतः प्रस्तावः सभायां पठितः। सोऽयं प्रस्तावः सभायां सर्वानुमत्या

पारितः। गौरवास्पदमिदं यत् गुजरातराज्यस्य राज्यपालः अपि संस्कृतभारतीद्वारा संचाल्यमानायां पत्राचारद्वारा संस्कृतशिक्षणयोजनायां शिक्षार्थी वर्तते। तस्य, अन्येषां च संस्कृतजिज्ञासूनां सौकर्याय अस्मिन्नेव सम्मेलने पत्राचारपरीक्षायाः 'प्रवेशः' इत्याख्यस्य पाठ्यपुस्तकस्य हिन्दी-आवृत्याः विमोचनं, राज्यपालाय च अस्य पुस्तकस्य प्रतिकृतेः समर्पणं च जातम्।

ततः परं माननीयस्य गुजरातराज्यस्य राज्यपालेन सभायां स्वीयाः विचाराः प्रकटिताः। तेन उक्तं यत्, संस्कृतं जीवनस्य सम्यक् दिशां सूचयति। संस्कृतभाषया भगवद्गीता, अर्थशास्त्रम्, सुश्रुतसंहिता इत्यादयः अमूल्याः ग्रन्थाः अस्मभ्यं दत्ताः सन्ति। स्वभाषणे पाश्चात्यस्य विदुषः होरेस् विल्सनस्य, भारतस्य प्रथमस्य प्रधानमन्त्रिणः श्रीमतः जवाहरलालनहेरू महोदयस्य च संस्कृतविषयकान् विचारान् संश्राव्य तेन ज्ञापितं यत् संस्कृतम् अस्माकं पूर्वजेभ्यः प्राप्तः अमूल्यः निधिः अस्ति।

औपचारिकसभान्ते माननीयः राज्यपालः संस्कृतभारत्याः प्रकाशनानि, विविधाः प्रदर्शिनीः च अवालोकत। सांस्कृतिककार्यक्रमेषु कर्णावतीतः विशेषतया आगतेन नृत्यनिपुणानां समूहेन सरस्वतीवन्दना, शिवताण्डवस्तोत्रं च अवलम्ब्य मनोरमं समूहनृत्यद्वयं प्रदर्शितम्। श्रीसोमनाथसंस्कृतविश्व-विद्यालयस्य छात्रैः कार्यक्रमे अद्भुतं योगप्रदर्शनं संस्कृतगरबानृत्यं च प्रस्तुतम्। सम्मेलनान्ते भोजनं सम्प्राप्य सहभागिनः स्वस्थानानि अगच्छन्।

## शिवरात्र्युत्सवः




१७/२/२०१५ दिनाङ्के शिवरात्रि-महोत्सवस्यायोजनं श्रीसोमनाथमन्दिरे अभवत्। तत्र श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य च्छात्रैः छात्राभिश्च भागो गृहीतः। २१ कोटिपरिमितं जपाख्यं कार्यं करणीयम् आसीत्। तत्रैभिः छात्रैः प्रेरणां दत्त्वा तत्कर्मणि साफल्यं प्राप्तम्। अत्र च्छात्रैः सह डॉ. दीपेशकतिरा प्रोत्साहनं दत्त्वा जपाख्यं कार्यं कृतवान्।

१८/२/२०१५ TV9 इत्यस्य भक्तिकार्यक्रमस्य ११०० भागाः पूर्णतां प्राप्ताः, तदर्थं शुभेच्छां दातुं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य च्छात्रैः मन्त्रघोषः कृतः। अत्र श्रीमता आचार्यवर्येण डॉ. नरेन्द्रभाईपण्ड्या महोदयेन अपि शुभेच्छा प्रदत्ता तथा च डॉ. अमृतलालभोगायता परमादरणीयेभ्यः श्रीमोरारिबापुभ्यः स्वरचितानि काव्यानि समर्पितवान्। श्रीमद्भिः मोरारिबापुभिरपि श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य मुक्तकण्ठेन प्रशंसा विहिता।

## क्रिकेट टुर्नामेन्ट



श्रीसोमनाथसंस्कृतविश्वविद्यालये छात्रैः क्रिकेट-क्रीडायाः आयोजनं कृतम्। तस्यां चत्वारः गणाः आसन्। शास्त्री-प्रथमवर्षस्य वेदव्यासगणः, द्वितीयवर्षस्य वाल्मीकिगणः, तृतीयवर्षस्य कालिदासगणः, आचार्य-तत्त्वाचार्ययोः मिश्रितः वेदनारायण-गणश्च। निर्णायकक्रीडायां (Finale) वाल्मीकिवेदनारायणगणयोर्मध्ये वाल्मीकिगणेन विजयं प्राप्य प्रथमं स्थानं प्राप्तम्। अन्तिमक्रीडायां स्पर्धालुभिः छात्रैः सर्वेषां कृते अल्पाहारादि व्यवस्था कृता आसीत्। विजेतृभ्यः पारितोषिकं दत्त्वा उपक्रमोऽयं समाप्तिं प्रति नीतः।

## द्विदिवसीयराष्ट्रियसंगोष्ठी



श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलमेवं श्रीब्रह्मर्षिसंस्कृत-महाविद्यालय-नटपुरम् इत्यनयोः संयुक्तोपक्रमेण **'वर्तमानसामाजिक-विसङ्गतिसमाधाने संस्कृतसाहित्यस्य प्रासङ्गिकता'** विषयमादाय द्वि-दिवसीयराष्ट्रियपरिसंवादस्यायोजनं फाल्गुनमासस्य शुक्लपक्षे २७/२८-फरवरी-२०१५ शुक्र-शनिवासरौ समभवत्।

ब्रह्मर्षिसंस्कृतमहाविद्यालयस्य संस्थापकाः पूज्यवर्याः डाह्याभाई शास्त्रीजीमहोदयानां नवतितमवर्षानुसंधाने समायोजिते परिसंवादे उद्घाटकाः पूज्यवर्याः डाह्याभाईशास्त्रीमहोदयाः आशीर्वादेन, श्रीसोमनाथसंस्कृतविश्व-विद्यालयस्य संलग्नाः आर्षशोधसंस्थानस्य नियामकस्य साधुश्रुतिप्रकाशदासस्य आध्यक्षत्वेन, श्रीसंपूर्णानन्दसंस्कृतविद्यालयस्य डॉ. कमलाकान्तत्रिपाठी महोदयस्य सारस्वतेन परिसंवादस्य उद्घाटनम् अभवत्।

प्रथमदिने द्वयोः सत्रयोः डॉ. कमलाकान्तत्रिपाठी एवं डॉ. कश्यपत्रिवेदी इत्युभयोः सत्राध्यक्षतायां पाठशालाभ्यः महाविद्यालयेभ्यः विश्वविद्यालयेभ्यः आगताः प्राध्यापकाः प्राचार्याः शोधार्थिनः एकादश शोधपत्राणि पठितवन्तः।



द्वितीयदिने समायोजितयोः सत्रयोः प्रो. निरंजनपटेलः (सरदार पटेल युनि., आणंद) एवं डॉ. गजेन्द्रपण्डा (एल. डी. आर्ट्स कालेज, अमदावाद) इत्यनयोः सत्राध्यक्षत्वेन द्वादशाधिकानि शोधपत्राणि प्रस्तुतानि। अनन्तरं प्रो. वेम्पटिकुटुम्बशास्त्रिणः (माननीयाः कुलपतयः, श्रीसोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्) अध्यक्षत्वेन एवं च आनन्दाश्रम-नटपुरतः स्वामी मुदितवदनानन्दमहोदयस्य सारस्वतेन समापनसमारोहः समायोजितः। तत्र च तैः प्रेरणात्मकं सम्बोधनं कृतम्।

संपूर्णस्यास्य द्विदिवसीयपरिसंवादस्य डॉ. महेन्द्रकुमारदवे (साहित्याचार्यः (एसो. प्रोफ.) श्रीसोमनाथसंस्कृतविश्वविद्यालयः) एवं डॉ. कार्तिकपण्ड्या (संशोधनाधिकारी, श्रीसोमनाथ-संस्कृतविश्वविद्यालयः) संयोजनम् अकुरुताम्।

## राष्ट्रियसेवायोजना (N.S.S.)



श्रीसोमनाथसंस्कृतविश्वविद्यालय-सञ्चालितसंस्कृतमहाविद्यालयस्य सप्तदश च्छात्रैः डॉ. रमेशचन्द्रशुक्ल-महोदयस्य मार्गदर्शने राष्ट्रियसेवायोजना (N.S.S.) अन्तर्गत-स्वच्छता-शिबिरम् आयोजितमासीत् दिनाङ्क ९ तः १५ मार्च् २०१५ पर्यन्तम्। स्थानमासीत् तालालानगरस्य समीपस्थः ग्रामः रमळेची। तत्र अस्मच्छात्रैः सप्तदिनपर्यन्तं श्रमयज्ञं कृत्वा पूर्णः ग्रामः स्वच्छः कृतः। ग्रामजनाः अपि अस्य कार्यक्रमस्य प्रशंसां कृतवन्तः।

## युवकमहोत्सवः-२०१५


श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य अधिकारीगणः, अध्यापकगणः, छात्राश्च

श्रीसोमनाथसंस्कृतविश्वविद्यालयः तथा श्रीब्रह्मर्षिसंस्कृतमहाविद्यालयः इत्यनयोः संयुक्तोपक्रमे श्रीब्रह्मर्षिसंस्कारधाम-नडियादनगरे दिनाङ्क १ तः ३ मार्च यावत् युवकमहोत्सवः प्रावर्तत। माननीयानां मुख्यमन्त्रिणां आनन्दीबेनपटेलमहोदयानां करकमलैः अस्याः युवकमहोत्सवपताकायाः उद्घाटनम् अभवत्। महोत्सवेऽस्मिन् छात्रैः विविधासु शैक्षणिकस्पर्धासु चित्रसंगीतादिस्पर्धासु क्रीडास्पर्धासु च स्वकौशल्यं प्रदर्शितम्।

युवकमहोत्सवस्यास्य उद्घाटनसत्रे श्रीब्रह्मर्षिसंस्कारधामसंस्थायाः संस्थापकानां परमपूज्यडायाभाई-शास्त्रिवर्याणां, श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य पूज्यपादानां कुलपतिवर्याणां श्रीवेम्पटिकुटुम्बशास्त्रि-महाभागानां, सन्तवर्याणां स्वामिमुदितवदनानन्दसरस्वतीवर्याणां, विश्वविद्यालयस्य माननीयानां कुलसचिवपादानां डॉ. दशरथभाईजादवमहोदयानां उपस्थितिः स्पर्धालुभ्यः छात्रेभ्यः प्रेरणाप्रदा उत्साहवर्धिका च आसीत्।

युवकमहोत्सवेऽस्मिन् नवविंशति (२९) संस्थाः भागं ऊढवत्यः। एवं शतचतुष्ट्याधिकाः स्पर्धालवः स्वप्रतिभां प्रदर्शितवन्तः। कार्यक्रमान्ते तृतीये दिवसे अनुमध्याह्ने युवकमहोत्सवस्य समापनसमारोहः आसीत्। माननीयानां कुलपतिपादानां आध्यक्षत्वेन कार्यक्रमस्य समापनमभवत्। अत्र पूज्यानां मुदितवदनानंदसरस्वतीमहोदयानां विशेषोपस्थितिरासीत्। तैः सदुक्तिभिः स्पर्धकानां कलानां प्रतिभानां च प्रशंसा कृता। अध्यापकमण्डलस्य प्रमुखवर्यः श्रीमहेशभाईठाकरः एवं पूर्वप्रमुखवर्यः श्रीगोविन्दभाईपटेलवर्यः, श्रीकृष्णप्रसादनिरौलामहोदयः च अधिमञ्चस्थाः आसन्। विश्वविद्यालयस्य कुलसचिवमहोदयाः डॉ. दशरथभाईजादवमहोदयाः सर्वेषाम् आभारभावं विश्वविद्यालयपक्षतः प्रकटितवन्तः।

अधिमञ्चस्थमहानुभावैः क्रमप्राप्तानां स्पर्धालूनां चन्द्रकैः सम्माननं कृतम्।

सम्पूर्णाष्वपि स्पर्धासु द्वितीयं क्रमं श्रीवरतन्तुसंस्कृतमहाविद्यालयेन लब्धः तथा रनर्सअप इत्याख्यः पुरस्कारः तां संस्थां प्रति गतः। एवं श्री सोमनाथसंस्कृतविश्वविद्यालय-सञ्चालित-संस्कृतमहाविद्यालयः प्रथमं क्रमम् अवाप्तवान्, अतः प्रथमक्रमस्य पुरस्कारं तथा चलितविजयवैजयन्तीं प्राप्नोत्।

सम्पूर्णकार्यक्रमस्य सञ्चालनं व्यवस्थापनं च डॉ. डी. एम्. मोकरीया, प्रा. जयेशः मुंगरा, डॉ. महेन्द्रभाई दवे, प्रा. संजयभाई ब्रह्मभट्टः, डॉ. शत्रुघ्नः पाणिग्राहीः, भद्रेशभाई व्यासः, प्रा. पन्नालालव्यासः, प्रा. बिपिनभाई जोशी, प्रा. क्षितीश्वरनाथपाण्डेयप्रभृतयः कृतवन्तः। तत्रत्यानाम् आचार्यवर्याणां श्रीमतां कृष्णप्रसादनिरौलामहाभागानां सहयोगः सर्वेभ्यः प्रेरणाप्रदः आसीत्।

## पत्रकारपरिसंवादः

राजकोटस्थ प्रादेशिक-संसूचन-कार्यालयेन गीरसोमनाथजनपदीयेन संसूचन-कार्यालयेन च सङ्गम्य एक-दिवसीया परिषद् श्रीसोमानाथसंस्कृत-विश्वविद्यालये ११/३/२०१५ तमे दिनाङ्के समायोजिता। परिषद्यस्यां 'फूलछाब' इत्यादयायाः प्रथितयशस्कायाः दैनिकवृत्तपत्रिकायाः प्रधानः सम्पादकः श्रीमान् कौशिकभाईमहेता मुख्यवक्तृत्वेन समुपस्थितः आसीत्। गीर-सोमनाथजनपदस्य अधिक-समाहर्ता श्रीमान् विष्णुराजपुतमहोदयः, विश्वविद्यालयस्य व्याकरणसङ्कायस्य अध्यक्षः प्रोफेसर् विनोदकुमारः झा-महोदयः, प्रादेशिक-संसूचन-कार्यालयस्य संसूचन-उपनियामकः श्रीमान् निराला-जोषी-महोदयः, विश्वविद्यालयस्य कुलसचिवः श्रीमान् दशरथ-जादव-महोदयः, जनपदस्य संसूचन-अधिकारी श्रीमान् अर्जुनपरमारमहोदयः च परिषदि समुपस्थितेषु महानुभावेषु अन्यतमाः।

गुजरातराज्यस्य पर्यटनक्षेत्राणां विकासने प्रसारमाध्यमानां योगदानम् इत्यमुं विषयम् आश्रित्य इयं परिषत् प्रवृत्ता। जगति सम्प्रति सर्वाधिकेन वेगेन विकासमानेषु क्षेत्रेषु पर्यटनक्षेत्रम् अग्रगामि वर्तते। क्षेत्रमिदं महता प्रमाणेन स्थानीयजनानां वृत्त्यवसरान् कल्पयति। कच्छप्रदेशस्थस्य श्वेत-मरुस्थल्याः पर्यटकप्रियता सम्प्रति वर्धमाना अस्ति। अस्य श्रेयः प्रसारमाध्यमानामेव वर्तते। प्रसारमाध्यमद्वारा यदि इतोऽपि योजनाबद्धः प्रयत्नः विधीयेत तर्हि धार्मिकपर्यटने महती वृद्धिः भवितुमर्हति, एवमादयः विचाराः परिषदि समुपस्थितैः महाभागैः अभिव्यक्ताः। विश्वविद्यालयसंलग्नस्य महाविद्यालये अधीयानाः शास्त्रि-तृतीय-वर्षीयाः छात्राः अपि अन्यैः सदस्यैः सह समुपस्थाय पत्रकारिताविषयकं ज्ञानम् अवाप्तवन्तः। विश्वविद्यालयस्य केचन अध्यापकाः अपि परिषदि भागमवहन्।



## स्वच्छविश्वविद्यालयः

स्वच्छं भारतं, निर्मलं भारतमिति अभियानान्तर्गतः स्वच्छताऽभियानं प्रचाल्यते विश्वविद्यालये प्रत्येकं मासस्य द्वितीयदिनाङ्के। अभियानेऽस्मिन् अधिकारिणः अध्यापकाः छात्राश्च संभूय स्वच्छताकार्यं कुर्वन्ति।

## नूतनः पाठ्यक्रमः

वेरावलस्थ श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा 'पोस्ट-ग्रेज्युएट्-डिप्लोमा इन हिन्दुस्टडिज्' एवं 'ग्रेज्युएट्-डिप्लोमा इन हिन्दुस्टडिज्' इति पाठ्यक्रमद्वयस्य निर्माणं १६/३/२०१५ तमे दिनाङ्के जातम्। एन्.आर्.आई. जनानां कृते रचितोऽसौ अभ्यासक्रमः नितरां श्लाघ्यतरो वर्तते। प्रश्नपत्रत्रयान्वितः, पञ्चचत्वारिंशदधिकशतघटाणात्मकोऽयं पाठ्यक्रमः विश्वविद्यालयस्य सारङ्गपुरकेन्द्रे सुचारुरूपेण पाठयिष्यते। पाठ्यक्रमनिर्माणे समुपस्थिताः महानुभावाः इत्थं -

(१) मा.कुलपतयः - प्रॉ. वेम्पटिकुटुम्बशास्त्रिणः
(२) डॉ. श्रुतिप्रकाशः स्वामी
(३) डॉ. देवेन्द्रनाथः पाण्डेयः
(४) डॉ. विनोदकुमारः झा
(५) डॉ. गजेन्द्रः पण्डा
(६) स्वामी आत्मतृप्तदासः
(७) स्वामी परमतत्त्वदासः
(८) डॉ. ललितः पटेलः
(९) डॉ. दीपेशः कतीरा



## युनिवर्सिटी की उपलब्धियाँ

(१) दिनांक १९-१०-२०१४ से २३-१०-२०१४ तक M.D.S. युनिवर्सिटी, अजमेर में Inter-University Zonal Youth Festival का आयोजन किया गया। जिसमें श्री सोमनाथ संस्कृत युनिवर्सिटी, वेरावल ने भाग लिया। युनिवर्सिटी के आठ छात्रों को प्रोत्साहन पुरस्कार दिया गया व 'रंगोली' स्पर्धा में युनिवर्सिटी के छात्र को **द्वितीय पुरस्कार** प्राप्त हुआ।

(२) दिनांक ०६-०१-२०१५ से ०९-०१-२०१५ तक त्रिपुराराज्यान्तर्गत अगरतल्ला शहर में ''अखिलभारतीयान्तः संस्कृतविश्वविद्यालय-युवमहोत्सवः द्वितीयः'' राष्ट्रियसंस्कृतसंस्थान-एकलव्यपरिसर में आयोजित किया गया । इस युवकमहोत्सव में श्री सोमनाथ संस्कृत युनिवर्सिटी, वेरावल के ४५ छात्रों ने भाग लिगा । ४४ पदकों के साथ **द्वितीय स्थान** प्राप्तकर के श्री सोमनाथ संस्कृत युनिवर्सिटी को गौरवान्वित किया ।

(३) दिनांक ०७-०१-२०१५ से १३-०१-२०१५ तक गुजरात सरकार द्वारा गांधीनगर में आयोजित Vibrant Gujarat में इस युनिवर्सिटी ने प्रशंसनीय प्रदर्शनी तैयार कर Education Pavilion में **प्रथम स्थान** प्राप्त किया।

(४) दिनांक २७-०१-२०१५ से ३०-०१-२०१५ तक तिरुपतिस्थ राष्ट्रिय संस्कृत विद्यापीठ द्वारा आयोजित नवम अखिल भारतीय संस्कृत छात्र प्रतिभ समारोह-२०१५ का आयोजन किया गया, जिसमें श्री सोमनाथ संस्कृत विश्वविद्यालय, वेरावल ने भाग लिया। इस विश्वविद्यालय के १४ छात्रों ने विभिन्न शैक्षणिक और सांस्कृतिक स्पर्धाओं में भाग लिया, जिसमें युनिवर्सिटी को संस्कृत नाट्य स्पर्धा में **तृतीय पुरस्कार** तथा युनिवर्सिटी के छात्र को वेद-भाषणस्पर्धा में सांत्वना पुरस्कार प्राप्त हुआ।

(५) M.H.R.D., New Delhi द्वारा किये गये All India Survey on Higher Education: 2014-15 की रिपोर्ट समग्र गुजरात राज्य में सर्वप्रथम प्रस्तुत करने हेतु श्री सोमनाथ संस्कृत युनिवर्सिटी, वेरावल को KCG, गुजरात सरकार, अहमदाबाद द्वारा **प्रथम क्रम** दिया गया।

(६) ४-३-२०१५ तमे दिनाङ्के U.S.A. इत्यस्य ''Oxford University'' इत्यस्मात् स्थानात् प्रो. एस्. एस्. रामारावमहोदयः श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य परिचयं प्राप्तुम् आगतवान् आसीत्। तेन सर्वतोमुखम् अवलोकनं विधाय विश्वविद्यालयस्य वातावरणं दृष्ट्वा भूरि भूरि प्रशंसा कृता।

## सप्तमदीक्षान्तसमारोहे पदकविजेतॄणां नामनि
### (दिनाङ्कः १६/२/२०१५)

| विद्यार्थिनाम | महाविद्यालयः | पदक संख्या |
|---|---|---|
| | **शास्त्री कक्षा (समग्र)** | |
| शीलु निकुल शान्तिलालः | श्री आणंदाबावावेदांतसंस्कृतमहाविद्यालयः, धोरीवावः | ४ |
| पुराहित केतनकुमार अशोकभाई | श्री बाबडेश्वरसंस्कृतमहाविद्यालयः, पोरबंदरम् | ३ |
| पुरोहित आनंदकुमार सुरेशभाई | श्री बाबडेश्वरसंस्कृतमहाविद्यालयः, पोरबंदरम् | ३ |
| | **शास्त्री कक्षा (फलित ज्योतिष)** | |
| उपाध्याय उज्जवल मनोजकुमार | श्री ब्रह्मर्षिसंस्कृतमहाविद्यालयस्य, नडीयादः | १ |
| पंडया कुशल प्रद्युम्न | श्री ब्रह्मर्षिसंस्कृतमहाविद्यालयस्य, नडीयादः | १ |
| दवे हर्षल यज्ञेशकुमार | श्री ब्रह्मर्षिसंस्कृतमहाविद्यालयस्य, नडीयादः | १ |
| | **शास्त्री कक्षा (साहित्य)** | |
| त्रिवेदी मार्गवकुमार दिनेशभाई | श्रीनारायणसंस्कृतमहाविद्यालय, पेटलादः | १ |
| हलबे विनायककुमार संतोषभाई | श्रीडाकोरसंस्कृतपाठशाला, डाकोरः | १ |
| पाठक भावेश रमेशचन्द्रः | श्रीडाकोरसंस्कृतपाठशाला, डाकोरः | १ |
| | **शास्त्री कक्षा (शुक्लयजुर्वेदः)** | |
| तेरैया मनिष प्रभाशंकरभाई | श्रीभारतीयचतुर्धामवेदभवन विद्यालयस्य, द्वारका | १ |
| | **आचार्य कक्षा (समग्र)** | |
| त्रिवेदी राहुल रविन्द्रभाई | श्री सोमनाथ संस्कृत युनिवर्सिटी अनुस्नातकभवनम्, वेरावलम् | ३ |
| त्रिवेदी मनिषकुमार अनिलभाई | श्रीनारायणसंस्कृतमहाविद्यालयः, पेटलादः | ३ |
| व्यास पार्थ ईश्वरलालः | श्रीब्रह्मर्षिसंस्कृतमहाविद्यालयः, नडीयादः | ५ |
| | **आचार्य कक्षा (फलित ज्योतिष)** | |
| जोषी कौशिककुमारमधुकांतः | श्रीब्रह्मर्षिसंस्कृतमहाविद्यालयः, नडीयादः | २ |
| भट्ट भार्गवकुमार हरिहरभाई | श्रीब्रह्मर्षिसंस्कृतमहाविद्यालयः, नडीयादः | २ |
| मिश्रा प्रशान्त शशिभुषणः | श्रीस्वामीहिरापुरीजीसंस्कृत महाविद्यालयस्य | १ |
| | **आचार्य कक्षा (नव्य व्याकरण)** | |
| आरंभडिया रवि कांतिलालः | श्री बाबडेश्वरसंस्कृतमहाविद्यालयः, पोरबंदरम् | १ |
| दवे ध्रुव अश्विनभाई | श्री बाबडेश्वरसंस्कृतमहाविद्यालयः, पोरबंदरम् | १ |
| | **आचार्य कक्षा (पुराणेतिहासः)** | |
| बामटा भरतकुमार नानजीभाई | श्रीवरतंतु संस्कृत महाविद्यालय, सोला, अमदावाद | १ |
| मेहता भानुशंकर कांतिलालः | श्रीवरतंतु संस्कृत महाविद्यालय, सोला, अमदावाद | १ |
| | **आचार्य कक्षा (शुक्ल यजुर्वेदः)** | |
| महेता मिलन दिपककुमारः | श्री सोमनाथ सस्कृत युनिवर्सिटी अनुस्नातक भवन, वेरावल | १ |
| माकडिया नितिनकुमार देवजीभाई | श्री सोमनाथ सस्कृत युनिवर्सिटी अनुस्नातक भवन, वेरावल | १ |
| | **आचार्य कक्षा (वास्तुशास्त्रम्)** | |
| ठाकोर ज्योतिकाबहेन जशभाई | श्रीएन. एस. पटेल आर्टस कोलेज, आणंदः | १ |
| मछार विक्रमभाई रंगाभाई | श्रीएन. एस. पटेल आर्टस कोलेज, आणंदः | १ |
| झाला हिरेनकुमार बालुसिंह | श्रीएन. एस. पटेल आर्टस कोलेज, आणंदः | १ |
| | **आचार्य कक्षा (योग)** | |
| राम मनिषाबेन भीखाभाई | श्री सोमनाथसंस्कृतयुनिवर्सिटी अनुस्नातकभवनम्, वेरावलम् | १ |
| परमार प्रतिभाबहेन नाथाभाई | श्री सोमनाथसंस्कृतयुनिवर्सिटी अनुस्नातकभवनम्, वेरावलम् | १ |
| वडुकर मनिषाबहेन ललीतभाई | श्री सोमनाथसंस्कृतयुनिवर्सिटी अनुस्नातकभवनम्, वेरावलम् | १ |
| | **शिक्षाशास्त्री कक्षा** | |
| पटेल चिराग सुरेशभाई | श्री एम.सी.बी.एन्ड.के.जे.टी.बी.एड. कोलेज, सोला, अमदावादः | २ |
| जोषी धार्मिक अतुलभाई | श्री एम.सी.बी.एन्ड.के.जे.टी.बी.एड. कोलेज, सोला, अमदावादः | २ |
| देवधर गजानन किरनभाई | श्री एम.सी.बी.एन्ड.के.जे.टी.बी.एड. कोलेज, सोला, अमदावादः | २ |
| | **पी.जी.डी.सी.ए. कक्षा** | |
| कानाबार सोनलबेन प्रविणभाई | श्री एम.एन.कंपाणी पीजीडीसीए स्टडीसेन्टर, मांगरोलः | १ |
| ठुम्मर क्रिष्नाबहेन प्रविणभाई | ऐम. वी. पटेल पीजीडीसीए स्टडीसेन्टर, जुनागढः | १ |
| वांदरवाला निराली देवीदासः | श्री सोमनाथसंस्कृतयुनिवर्सिटी अनुस्नातकभवनम्, वेरावलम् | १ |

# अध्यापकानामुपलब्धयः

**प्रो. अर्चना दुबे** (प्रोफेसर – साहित्यम्)

- ६-९/१/२०१५ दिनाङ्कं यावत् अखिलभारतीयसंस्कृतविश्वविद्यालययुवमहोत्सवे छात्राणां मार्गदर्शनमेवं दलस्य प्रमुखत्वम् ऊढम्।
- १०/२/२०१५ तमे दिनाङ्के काशीहिन्दुविश्वविद्यालय-वाराणस्यां समायोजिते राष्ट्रियसम्मेलने "**अर्वाचीन संस्कृत साहित्य की प्रवृत्तियाँ**" विषये स्वशोधपत्रं प्रस्तुतम्।
- १४/२/२०१५ तमे दिनाङ्के भोपालस्थ-संस्कृत-संस्कृति-संवर्धन-संगठन इत्यनेन आयोजिते अन्ताराष्ट्रियशैक्षिकसम्मेलने "**संस्कृतसाहित्ये नारी-शिक्षा**" इति विषये स्वकीयं शोधपत्रवाचनं Video Conference द्वारा कृतम्।
- १/३/२०१५ तः ३/३/२०१५ दिनाङ्कं यावत् श्रीसोमनाथसंस्कृत-युनिवर्सिटी-वेरावलमेवं श्रीब्रह्मर्षिसंस्कृतमहाविद्यालय-नटपुरम् इत्यनयोः संयुक्तोपक्रमे समायोजिते त्रिदिवसीययुवमहोत्सवे युनिवर्सिटीच्छात्राणां मार्गदर्शनं कृतम्।
- १५/३/२०१५ तमे दिनाङ्के श्रीमती सी.पी. चोकसी कॉलेज-वेरावल द्वारा समायोजिते राष्ट्रियसंगोष्ठ्यां "**संस्कृत शिक्षा का वैश्वीकरण**" इति विषये स्वशोधपत्रं प्रस्तुतम्।
- २६/३/२०१५ – श्री सोमनाथसंस्कृतविश्वविद्यालये वाक्यार्थपरिषदः पञ्चमाधिवेशने "**भवभूतेरमोघत्वम्**" इति विषये स्वकीयं वाक्यार्थं प्रस्तुतम्।

**डॉ. दीपेशकतिरा** (सहायकाचार्यः – व्याकरणम्)

- २४/७/२०१४ तः ३/८/२०१४ पर्यन्तं श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा समायोजिते ५४ संस्कृतसम्भाषणशिबिरात्मके अभियाने **सह-संयोजकत्वम्** ऊढम्।
- १५/२/२०१५ तमे दिनाङ्के संस्कृतभारती, श्रीसोमनाथन्यासः, श्रीसोमनाथसंस्कृत-विश्वविद्यालयेन च संगत्य समायोजिते संस्कृतसम्मेलने **संयोजकत्वम्** ऊढम्।
- १०/३/२०१५ – श्रीसोमनाथसंस्कृतविश्व-विद्यालये वाक्यार्थपरिषदः चतुर्थाधिवेशने "**संस्कृतभाषायां सङ्ख्याप्रयोगविमर्शः**" इति विषये स्वकीयं वाक्यार्थं प्रस्तुतम्।

**श्रीउमाशंकरझा** (सहायकाचार्यः – ज्योतिषम्)

- १४/२/२०१५ तमे दिनाङ्के भोपालस्थ-संस्कृत-संस्कृति-संवर्धन-संगठन इत्यनेन आयोजिते अन्ताराष्ट्रियशैक्षिकसम्मेलने स्वकीयं शोधपत्रवाचनं Video Conference द्वारा कृतम्।
- २७/२/२०१५ तः २८/२/२०१५ दिनाङ्कं यावत् श्रीसोमनाथसंस्कृत-युनिवर्सिटी-वेरावलमेवं श्रीब्रह्मर्षिसंस्कृतमहाविद्यालय, नटपुरम् इत्यनयोः संयुक्तोपक्रमे समायोजिते द्विदिवसीयराष्ट्रिय-संगोष्ठ्यां "**साम्प्रतसमाजे ज्योतिषशास्त्रस्य लोकोपकारकत्वम्**" विषये स्वशोधपत्रं प्रस्तुतम्।
- १३/३/२०१५ तः १५/३/२०१५ दिनाङ्कं यावत् गुरुकुलकांगडीविश्वविद्यालय-हरिद्वारे समायोजिते त्रिदिवसीयराष्ट्रियसंगोष्ठ्यां "**वैदिकवाङ्मये संख्याविचारः**" विषये स्वशोधपत्रं प्रस्तुतम्।
- १७-१८/३/२०१५ दिनाङ्कं यावत् काशीहिन्दुविश्वविद्यालय-वाराणस्यां समायोजिते द्विदिवसीयअखिलभारतीयज्योतिष-सम्मेलने "**गोलाध्याये प्रयुक्त पाटीगणित प्रकियाणां विश्लेषणम्**" इति विषये स्वशोधपत्रं प्रस्तुतम्।
- ४/४/२०१५ – श्रीसोमनाथसंस्कृतविश्वविद्यालये वाक्यार्थपरिषदः षष्ठाधिवेशने "**कालस्वरूपम्**" विषये स्वशोधपत्रं प्रस्तुतम्।

**बी. उमामहेश्वरी** (सहायकाचार्यः – न्यायः)

- १४/२/२०१५ तमे दिनाङ्के भोपालस्थ-संस्कृत-संस्कृति-संवर्धन-संगठन इत्यनेन आयोजिते अन्ताराष्ट्रियशैक्षिकसम्मेलने "**न्यायदर्शने शिक्षायाः स्वरूपम्**" इति विषये स्वकीयं शोधपत्रवाचनं Video Conference द्वारा कृतम्।
- २६/२/२०१५ तः २८/२/२०१५ दिनाङ्कं यावत् दिल्लीसंस्कृत-अकादमी, दिल्लीद्वारा समायोजिते अखिलभारतीयविदुषीसम्मेलने "**संस्कृतिशिक्षणे नारीणां योगदानम्**" विषये स्वशोधपत्रं प्रस्तुतम्।
- १५/३/२०१५ तमे दिनाङ्के श्रीमती सी.पी. चोकसी कोलेज, वेरावल द्वारा समायोजिते राष्ट्रियसंगोष्ठ्यां "**वैदिक शास्त्रों में शिक्षा का स्वरूप**" विषये स्वशोधपत्रं प्रस्तुतम्।
- ४/४/२०१५ – श्रीसोमनाथसंस्कृतविश्वविद्यालये वाक्यार्थपरिषदः षष्ठाधिवेशने "**न्यायशास्त्रीय प्रकरणग्रन्थानां परिचयः**" विषये स्वशोधपत्रं प्रस्तुतम्।

# INDIVIDUAL ACHIEVEMENTS

## Dr. Kartik Pandya (Research Officer)

- **Editor** in the Tenth Issue of the *Somajyotiḥ* - Shree Somnath Sanskrit University Newsletter that was published on 31st July, 2014.
- **Co-ordinator** of the Five-Days Workshop on "Vedic Mathematics" jointly organised by Shree Somnath Sanskrit University, Veraval and Vidya Bharati, Ahmedabad at Shree Somnath Sanskrit University, Veraval during 24th to 28th August, 2014.
- **University Nodal Officer** to All India Survey on Higher Education for the year 2013-14 and ranked the SECOND in the entire Gujarat state for uploading the data in DCFs on its portal online in its stipulated time limit.
- **Procured ISSN 2350-0700** for *Śodhajyotiḥ* - Shree Somanth Sanskrit University Annual Research Journal.
- **Co-ordinator** of University Ph.D. Entrance Examination conducted on 18th October, 2014.
- Published "*Bhīṣmacaritam* - A Critical Study" with complete financial assistance viz. **"Publication Award"** from Indian Council of Social Science Research (ICSSR), New Delhi for his Doctoral Thesis in November 2014.
- **University Nodal Officer** to All India Survey on Higher Education for the year 2014-15 and ranked the FIRST in the entire Gujarat state for uploading the data in DCFs on its portal online in its stipulated time limit.
- **Co-ordinator** of Shree Somnath Sanskrit University, Veraval to "Vibrant Gujarat Global Summit-2015" organised by Government of Gujarat, Gandhinagar during 7th to 13th January, 2015.
- **Co-ordinator** of National Seminar jointly organised by Shree Somnath Sanskrit University, Veraval and Shri Brahmarshi Sanskrit Mahavidyalaya, Nadiad on *"Vartamānasāmājikavisaṅgatisamādhāne Saṁskṛtasya Yogadānam"* during 27th to 28th February, 2015 at Shri Brahmarshi Sanskrit Mahavidyalaya, Nadiad.
- **Participated and presented** a research paper on "The Concept of Bhīṣma's Education in *Bhīṣmacaritam*" in One Day National Seminar organised by Smt. C.P. Choksi Arts College, Veraval on 15th March, 2015
- **Presented** a research paper on "Deviations Introduced in *Bhīṣmacaritam* by Dr. Hari Narayan Dikshit in Comparison to the *Mahābhārata*" in the Seventh Session of the *Vākyārtha-Pariṣad* in Shree Somnath Sanskrit University, Veraval on 6th April, 2015.

## वाक्यार्थपरिषत्

विश्वविद्यालयस्य विशिष्टेषु उपक्रमेषु अन्यतमः उपक्रमो वर्तते वाक्यार्थपरिषत् इति। अस्यां परिषदि अध्यापकानां विशिष्टव्याख्यानानामायोजनं प्रतिमासं क्रियते। तस्मिन् दिवसे द्वित्राः अध्यापकाः पूर्वचितविषयोपरि व्याख्यानविशेषं सर्वेषां छात्राणामध्यापकानां कुलपतीनां कुलसचिवानां च पुरतः प्रस्तुवन्ति। अध्यापकानां छात्राणां ज्ञानविकासार्थम् अयमुपक्रमः नितरां प्रसंशनीयः जातः।

**प्रथमाधिवेशनं – २९–०९–२०१४**

अध्यक्षः – **प्रो. वेम्पटिकुटुम्बशास्त्री**, कुलपतिः
मञ्चसञ्चालकः – श्रीजानकीशरणः, सङ्कायाध्यक्षः (दर्शनम्)
१. प्रो. विनोदकुमारझा – 'रँ' प्रत्याहारविमर्शः
२. डॉ. ललितपटेलः – भारतीयप्रतिभातत्त्वचिन्तनपरिप्रेक्षे राजशेखरदिशा प्रतिभा

**द्वितीयाधिवेशनं – १६–१०–२०१४**

अध्यक्षः – **डॉ. नरेन्द्रकुमारपण्ड्या**, प्राचार्यः
मञ्चसञ्चालकः – डॉ. ललितपटेलः, सहायकाचार्यः (साहित्यम्)
१. प्रो. देवेन्द्रनाथपाण्डेयः – वैदिकव्याख्यायाः घटकतत्त्वपरिशीलनम्
२. डॉ. अमृतलालभोगायता – दीक्षाविचारः
३. डॉ. शत्रुघ्नपाणिग्राही – वर्तमानसमये पर्यावरणसमस्या – तदर्थं वैदिकोपायाः

**तृतीयाधिवेशनं – २८–११–२०१४**

अध्यक्षः – **प्रो. देवेन्द्रनाथपाण्डेयः**, अध्यक्षः– (अनुस्नातकभवनम्)
मञ्चसञ्चालकः – श्री जानकीशरणः, सङ्कायाध्यक्षः (दर्शनम्)
१. डॉ. नरेन्द्रकुमारपण्ड्या – काव्यशास्त्रीयः गुणविमर्शः
२. डॉ. महेन्द्रदवे – मृच्छकटिके वर्णितः राजधर्मः
३. डॉ. पङ्कजरावलः – आरोग्यप्राप्तौ आहारविहारस्य योगदानम्

**चतुर्थाधिवेशनं – १०–०३–२०१५**

अध्यक्षः – **प्रो. विनोदकुमारझा**, व्याकरणसङ्कायाध्यक्षः
मञ्चसञ्चालकः – डॉ. अमृतलाल भोगायता, सङ्कायाध्यक्षः (पुराणम्)
१. डॉ. दीपेशकतिरा – संस्कृतभाषायां सङ्ख्याप्रयोगविमर्शः
२. श्रीजानकीशरणः – साधनचतुष्टयविमर्शः

**पञ्चमाधिवेशनम् – २६–०३–२०१५**

अध्यक्षः – **डॉ. नरेन्द्रकुमार पण्ड्या**, प्राचार्यः
मञ्चसञ्चालकः – डॉ. ललितपटेलः, सहायकाचार्यः (साहित्यम्)
१. प्रो. अर्चना दुबे – भवभूतेरमोघत्वम्

**षष्ठाधिवेशनम् – ०४–०४–२०१५**

अध्यक्षः – **प्रो. देवेन्द्रनाथपाण्डेयः**, अध्यक्षः (अनुस्नातकभवनम्)
मञ्चसञ्चालकः – श्रीजानकीशरणः, सङ्कायाध्यक्षः (दर्शनम्)
१. डॉ. डी.एम. मोकरिया – साहित्यदृष्ट्या धर्मः
२. डॉ. रमेशचन्द्रशुक्लः – ज्योतिषशास्त्रे पर्यावरणविज्ञानम्
३. बी. उमा माहेश्वरी – न्यायशास्त्रीयप्रकरणग्रन्थानां परिचयः
४. श्रीउमाशङ्करझा – कालस्वरूपम्

**सप्तमाधिवेशनम् – ०६–०४–२०१५**

अध्यक्षः – **डॉ. अमृतलालभोगायता**, पुराणसङ्कायाध्यक्षः
मञ्चसञ्चालकः – डॉ. पङ्कजरावलः, सहायकाचार्यः (पुराणम्)
१. डॉ. कार्तिकपण्ड्या – Deviations Introduced in *Bhīṣmacaritam* by Dr. Hari Narayan Dikshit in Comparison to the *Mahābhārata*.
२. श्रीरवीन्द्रकाले – Open Access and Institutional Repository (IR) or Digital Library (DL)
३. श्रीजयेशमुङ्गरा – મેદસ્વી બાળક: સમૃદ્ધિ કે સમસ્યા?

## समावर्त्तनसमारोहः

३१–३–२०१५ तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालय–सञ्चालित–संस्कृतमहाविद्यालयस्य शास्त्रितृतीयवर्षस्य च्छात्राणां समावर्त्तनसमारोहः सञ्जातः। तत्र डॉ.नरेन्द्रकुमारपण्ड्यामहोदयेन अध्यक्षपदमलङ्कृतम्। अन्यौ च प्राध्यापकौ श्रीललितपटेल–श्रीपङ्कजरावलौ उपस्थितौ आस्ताम्। छात्रैः स्मृतिचिह्नेन गुरूणां स्वागतं कृतम्। छात्राः स्वमनोभावान् उक्त्वा नैत्राश्रुयुताः अभवन्। गुरुभिः अपि आशिर्वचांसि दत्तानि।

## विद्यावारिधिकार्यशाला (Ph.D. Coursework)

विश्वविद्यालयानुदानायोगस्य (U.G.C.) नियमानुसारं श्रीसोमनाथसंस्कृत–विश्वविद्यालयेन २०१४–१५ इति शैक्षणिकवर्षस्य कृते विद्यावारिधिप्रवेशपरीक्षायाः आयोजनं कृतम्। विद्यावारिधिप्रवेशपरीक्षार्थं अष्टसप्ततिः (७८) शोधार्थिनः पञ्जीकरणं कृतवन्तः। तेषां पञ्चविंशति (२५) शोधार्थिनः उत्तीर्णाः जाताः। २०१२–१३ एवं २०१३–१४ शैक्षणिकवर्षयोः द्वाविंशतिः (२२) शोधार्थीनां तथा २०१४–१५ शैक्षणिकवर्षस्य पञ्चविंशतिः (२५) शोधार्थीनां आहत्य सप्तचत्वारिंशत् (४७) शोधार्थीनां कृते विद्यावारिधिकार्यशालायाः (Ph.D. Coursework) आयोजनं सञ्जातम्। विश्वविद्यालयानुदानायोगस्य नियमानुसारं षष्टिहोरात्मिका (60 Hours) विद्यावारिधिकार्यशालायाः आयोजनं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे सञ्जातम्। तत्र त्रिंशत् (३०) शोधार्थिनः उपस्थिताः आसन्। एतस्याः कार्यशालायाः अतिथिवक्तारः डॉ. बंसीधरउपाध्यायः, प्रो. डी.एन्. पांडेय, प्रो. कमलेशचोक्सी, प्रो. निरंजनपटेलः, प्रो. विनोदझा, प्रो. अर्चनादुबे, डॉ. न.ला.पण्ड्या, डॉ. राजेन्द्रप्रसादशुक्ला, डॉ. कश्यपत्रिवेदी, डॉ. राजेन्द्रचोटलिया, डॉ. प्रतापपण्ड्या, डॉ. महेन्द्रकुमारदवे, डॉ. श्वेताजेजुरकरः, श्रीमनोजव्यासः, श्रीहरेशखेरः, श्रीअमितसाधवाणी चासन्। तैः उचितं व्याख्यानं दत्तम्। अस्याः कार्यशालायाः संयोजकः डॉ. कार्तिकपण्ड्या एवं सहायकः श्रीहितेशजानी चास्ताम्।

(प्रथमपृष्ठतः.....)दीक्षान्तप्रवचनमकुर्वन् एतेषां प्रवचनपाण्डित्येन लालित्येन मञ्चासीनाः कुलाधिपतयः मन्त्रिणश्च प्रमुग्धाः समभवन्। अत्रावसरे अस्माकं परम्परानुसारेण संस्कृत–संस्कृतेः संरक्षणाय विश्वविद्यालयीयपरिसरस्थ–यज्ञशालायां निर्विघ्नेन समारम्भोऽयं पूर्णतां प्रति गच्छेत् तदर्थं यज्ञस्यायोजनं जातं यत्र मन्त्रिणां करकमलैः यज्ञानुष्ठानस्य पूर्णाहुतिः समर्पिता

सप्तमपदवीदानसमारोहस्याकर्षणत्वेन पुनरेकवारं विश्वविद्यालयेनानेन संस्कृतसेवापरायणानां संस्कृतसेवकानां संस्कृतानुरागिणां संस्कृतभाषायाः कार्यकर्तॄणां संस्कृतमातुः पुत्रकाणां त्रिमुनीश्वराणां नरशिखित्रयीभूतानां त्रयाणां महानुभावानां विद्यावाचस्पति (D.Litt.) सम्मानेन सम्माननं विहितं तथा च सम्मानेन अन्येभ्यः संस्कृतरसिकेभ्यः संस्कृतमातुः सेवां कर्तुं प्रेरणाः प्रदत्ताः प्रेरिताश्च कृताः।

सप्तमदीक्षान्तसमारोहे १७०१ छात्रैः शास्त्री–आचार्य–शिक्षाशास्त्री–पी.जी.डी.सी.ए.–विद्यावारिधिः इति विविधेषु शास्त्रेषु पदकानि प्रमाणपत्राणि च सम्प्राप्य शिक्षासन्तोषः ज्ञानोद्गारश्च सम्प्राप्तः।

विश्वविद्यालयस्यास्य पदवीदानसमारोहेऽस्मिन् मञ्चसञ्चालनं विश्वविद्यालयस्य प्राध्यापकेन डॉ. पङ्कजकुमाररावलमहोदयेन स्वोत्तरदायित्वंपूर्वकं निर्वाहितम्। तथा च पदकप्राप्तवतां छात्राणां विद्यावारिधिविद्यावाचस्पति–सम्मानेन विभूषितानां पदवीदानप्रसङ्गे डॉ.नरेन्द्रकुमारपण्ड्यामहोदयेन सभासञ्चालनकार्यभारः निर्वोढः। प्रासङ्गिकमुद्बोधनं कुलसचिवमहोदयैः डॉ. दशरथजादवमहोदयैः कृतं तथा च कुलाधिपतीनां राज्यपालमहोदयानां प्रेरकोद्बोधनान्ते मन्त्रिणां वाक् प्रसन्नताकुसुमानि कर्णाञ्जलौ निधाय अन्ते डॉ. कृष्णप्रसादनिरौलामहोदयैः कार्यकारिणी–परिषद्वरिष्ठसदस्यैः कृतज्ञता प्रकटिता। राष्ट्रगानेन अस्य समारोहस्य पूर्णाहूतिः सञ्जाता।

# શ્રી સોમનાથ સંસ્કૃત યુનિવર્સિટી

(ગુજરાત સરકારશ્રી દ્વારા સ્થાપિત તથા યુ.જી.સી. દ્વારા માન્ય)

**પ્રવેશ શરૂ**
**નિઃશુલ્ક ભોજન અને રહેવાની વ્યવસ્થા**

## અભ્યાસક્રમની પ્રવેશ યોગ્યતા, વિષય અને સમયગાળો

| ક્રમ | ડીગ્રી | વિષય | પ્રવેશ યોગ્યતા | સમયગાળો |
|---|---|---|---|---|
| ૧ | **વિદ્યાવારિધિ** (Ph. D.) | સાહિત્ય, વેદ, પુરાણ, જ્યોતિષ, વાસ્તુ, પૌરોહિત્ય, ન્યાય, સર્વદર્શન, વ્યાકરણ, મીમાંસા, ધર્મશાસ્ત્ર | ૫૫ % સાથે સંસ્કૃત વિષયમાં આચાર્ય (M. A.) | --- |
| ૨ | **તત્ત્વાચાર્ય** (M. Phil.) | સાહિત્ય, વેદ, પુરાણ, જ્યોતિષ, વાસ્તુ, પૌરોહિત્ય, ન્યાય, સર્વદર્શન, વ્યાકરણ, મીમાંસા, ધર્મશાસ્ત્ર | સંસ્કૃત વિષયમાં આચાર્ય (M. A.) | ૧ વર્ષ |
| ૩ | **આચાર્ય** (M. A.) (અનુસ્નાતક) | સાહિત્ય, વેદ, પુરાણ, જ્યોતિષ, વાસ્તુ, પૌરોહિત્ય, ન્યાય, સર્વદર્શન, વ્યાકરણ, યોગ | સંસ્કૃત વિષય સાથે સ્નાતક | ૨ વર્ષ |
| ૪ | **પી. જી. ડી. સી. એ.** | કોમ્પ્યુટર | કોઈપણ વિષયમાં સ્નાતક | ૧ વર્ષ |
| ૫ | **શિક્ષાશાસ્ત્રી** (B.Ed.) | સંસ્કૃત | કોઈપણ વિષયમાં સ્નાતક | ૨ વર્ષ |
| ૬ | **શાસ્ત્રી** (B.A.) (સ્નાતક) | સાહિત્ય, વેદ, પુરાણ, જ્યોતિષ, વાસ્તુ, પૌરોહિત્ય, ન્યાય, સર્વદર્શન, વ્યાકરણ | કોઈપણ પ્રવાહમાં ધો. ૧૨ પાસ | ૩ વર્ષ |
| ૭ | **ડિપ્લોમા** (પદવિકા) | યોગ, મંદિર વ્યવસ્થાપન, જ્યોતિષ, વાસ્તુ, કર્મકાંડ, સંસ્કૃત સંભાષણ, વૈદિક ગણિત, સંગીત | ધો. ૧૨ પાસ | ૧ વર્ષ |
| ૮ | **સર્ટિફિકેટ** (પ્રમાણપત્ર) | યોગ, કર્મકાંડ, વૈદિક ગણિત, સંગીત | ધો. ૧૦ પાસ | ૬ માસ |


## વિશ્વવિદ્યાલય પરિસરમાં

- સંસ્કૃત વિષયના નિષ્ણાત અધ્યાપકો દ્વારા અધ્યાપન કરાવવામાં આવે છે.
- સંસ્કૃત ભાષા બોલવા, લખવાની તાલીમ (સંસ્કૃત સંભાષણ) આપવામાં આવે છે. વિદ્યાસાધના અને સિદ્ધિ માટે સંસ્કૃતને લગતા રાજ્યસ્તરીય અને રાષ્ટ્રીય સેમિનારોનો લાભ મળી શકે છે. સંસ્કૃતમાં વક્તૃત્વ, સ્તોત્રગાન, ગીતા-ઉપનિષદ્-ભાગવત શ્લોકગાન જેવી વિવિધ સ્પર્ધાઓ દ્વારા વાચિક/લેખિક અભિવ્યક્તિની તાલીમ આપવામાં આવે છે.
- સ્નાતક અને અનુસ્નાતક કક્ષાએ ચોઇસ બેઇઝ્ડ ક્રેડિટ સિસ્ટમ (C.B.C.S.) અને સેમેસ્ટર પદ્ધતિનો અમલ કરવામાં આવેલ છે.
- સ્નાતક કક્ષાએ ફરજિયાત વિષયના રૂપમાં અંગ્રેજી અને કોમ્પ્યુટરનું શિક્ષણ આપવામાં આવે છે, જે માટે અદ્યતન કમ્પ્યુટર લેબની વ્યવસ્થા.
- યુનિવર્સિટી ખાતે સમૃદ્ધ પુસ્તકાલયની વ્યવસ્થા છે.
- ઈન્ડોર અને આઉટડોર ગેમ માટેના રમત-ગમતના સાધનોની વ્યવસ્થા તથા વિશાળ મેદાન ઉપલબ્ધ છે.
- બહારના વિદ્યાર્થીઓ માટે યુનિવર્સિટી દ્વારા રહેવા અને જમવા માટેની નિઃશુલ્ક વ્યવસ્થા કરવામાં આવી છે.
- એમ.ફિલ. અને પીએચ.ડી. માટે વખતો-વખત પ્રવેશ માટેની જાહેરાત આપવામાં આવે છે. યુનિવર્સિટી કક્ષાએ આયોજિત પ્રવેશ પરીક્ષા દ્વારા આ બંને અભ્યાસક્રમોમાં પ્રવેશ આપવામાં આવે છે.
- પાણ્ડુલિપિ-વિજ્ઞાન અને પાઠસંપાદનનું શિક્ષણ પણ આપવામાં આવે છે.

**વધુ માહિતી અને પ્રવેશ અંગેની પૂછપરછ માટે નીચેના નંબર પર સંપર્ક કરવો.**

(૧) ડૉ. મહેન્દ્રકુમાર દવે - મો. ૯૮૯૮૪ ૭૮૪૭૨
(૨) ડૉ. લલિત પટેલ - મો. ૯૮૭૯૮ ૩૪૦૭૧
૯૪૨૯૭ ૭૧૧૬૦
(૩) ડૉ. દીપેશ કતિરા - મો. ૯૫૯૪૩ ૫૬૮૫૭
(૪) શ્રી જાનકીશરણ - મો. ૮૭૫૮૮ ૧૭૫૨૫
(૫) ડૉ. અમૃતલાલ ભોગાયતા - મો. ૯૪૨૬૩ ૮૨૮૯૬

ઇ-મેઈલ: sssu.veraval@gmail.com
વેબસાઈટ: www.shreesomnathsanskrituniversity.info



"શ્રી સોમનાથ સંસ્કૃત યુનિવર્સિટી વ્યક્તિઓને નહીં, પરંતુ આખે આખી પેઢીને તૈયાર કરશે, અહીંથી પેઢીઓનું નિર્માણ થશે. આ યુનિવર્સિટી માનવની વાવણી માટેના એક મહાન અભિયાનનો પ્રારંભ છે."

**- શ્રી નરેન્દ્ર મોદી**